PREFACE

While collecting materials for my History of Hindu Chemistry I was very much struck with the wealth of information and chemical knowledge of which Rasárnava is the repository. Thus 'Nature' in its review of the "History of Hindu Chemistry" (Vol I) speaking of the progress of chemistry in ancient India quotes two remarkable passages from Rasárnava;

> "Copper yields a blue flame that of tin is pigeon-coloured, that of lead is pale tinted,"

and as another example:—

> "A pure metal is that which, when melted in a crucible, does not give off sparks, nor bubbles, nor spurts, nor emits any sound, nor shows any lines on the surface, but is tranquil as a gem" (see pp 51 52 vs 49 52) *

Among the alchemical Tantras Rasárnava holds a unique position and I have referred to it in the following terms in the Introduction to the History of Hindu Chemistry, Vol I, 2nd ed. Intro lxxxiii:

"It is to be regretted that of the several works quoted by Mádhava Rasárnava alone seems to have survived to our days. This work is almost unknown in Bengal, and extremely rare even in N India and the Deccan We have been fortunate enough

---

* "Nature", 1903, LXVIII, 51.

to procure a transcript of it in the Raghunátha Temple Library, Kashmir, and another from the Oriental MSS Library, Madras. As one of the earliest works of the kind, which throws a flood of light on the chemical knowledge of the Hindus about the 12th century A D., Rasárnava must be regarded as a valuable national legacy It has, besides the merit of being the inspirer of several works of the Iatro-chemical period, notably Rasaratna-samuchchaya and Rasendrachintámani."

It was thought highly desirable that the full and correct text of this great Tantra be presented to the world, and the Publication Committee of the Bibliotheca Indica have laid me under a debt of obligation by acceding to my request to include it in their series A serious difficulty, however, arose in the way of restoring the text The MSS mentioned above were both faulty and defective I was, however, fortunate in procuring three more transcripts from the libraries of Bikanir, the Deccan and Mysore respectively. The text of the present work is thus based upon a careful collation of five distinct MSS It is a remarkable fact that these MSS, though procured from such widely divergent sources, often concur in repeating the same errors There is a close agreement between the MS of Bikanir and that of Kashmir—possibly they are both derived from the same exemplar The Kashmir MS has been found to be on the whole complete and reliable, and it has been mainly followed The other MSS are more or less fragmentary, but these *disjecta membra* have been of signal service in throwing light upon doubt-

ful passages. Additional help has also been derived from a comparison of several extracts from Rasárnava with which Rasendrachintámani, Rasaratnasamuchchaya, Sarvadarsanasamgraha, Yogatarangini etc abound In spite of all these collateral advantages there was much that could be desired. While the third and concluding part of the present work was in the press, I received a letter from Kaviráj Durgánáráyan Sen Sástri, who had been to Jammu on a professional visit, volunteering his services for the search of rare Sanskrit MSS bearing upon Chemistry and Medicine Among the several MSS which the scholarly instinct of the Kaviraj had hit upon was one entitled Rasakámadhenu Although this work is merely a compilation it proved to me like a God send, as it is full of lengthy extracts from Rasárnava of remarkable textual accuracy Indeed, so material has been the help rendered by Rasakámadhenu that it has been thought advisable to draw up a list of corrections based upon this work and it has been inserted as an appendix

As the Preface appears over my signature alone, I avail myself of this opportunity of expressing my deep obligations to my collaborator, Pandit Harischandra Kaviratna, on whom has mainly devolved the vast labour of going carefully and critically through the text of the MSS He has also drawn up the exhaustive table of contents (अनुक्रमणिका) and the alphabetical index with glossary of technical terms. It is to be hoped that even a casual reader will have no difficulty in finding out the particular information he is in need of.

I have not attempted here any historical review of the Rasárnava. The probable date of the work will be found discussed at length in the History of Hindu Chemistry, Vol. I. Introduction, under the *Tantric Period* and in Vol II, Intro, ch I, under the *age of Nagárjuna and the alchemical Tantras*

P. C Ráy

Presidency College.
October, 1910.

रसार्णवस्य अनुक्रमणिका ।

सप्तम पटल —महारसोपरस-लोहलक्षण-संस्कार रत्नद्रावणमारण-निर्णय . ९५-१२५

द्वादशः पटलः—

ABBREVIATIONS USED IN THIS WORK.

B = Bikánir MS.
D = Deccan MS
K = Kásmir MS.
M = Madras MS
My = Mysore MS
d.r = different reading
gram = grammatically
inc. = incorrect
र चि = रसचिन्तामणि
र र. स or रस स = रसरत्नसमुच्चय
स द स = सर्व्वदर्शनसंग्रह ।

The following table of errata and variants is mainly based upon the authority of a big MS called रसकामधेनु, compiled by CHUDAMANI MISRA of Sákadwípa —the MS. having been at hand of the editors about the close of printing of the text

THE TABLE OF ERRATA AND VARIANTS.

Page	Line	For	Read
१४	७	सदृशो योनो	सदृश, पीनो
४५	४	सोहस्य	सोपस्य
५७	८	फणिविजिह्वा गोजिह्वा	गोजिह्वा फणिजिह्वा च
६०	१	तोरवल्ली	तोयवल्ली
,,	७	कङ्गुनी	कञ्चुकी
,,	,,	च पिपोलिजम्	चापि पीलुकम्
७४	८	सर्जधारो	सर्जिधारो
८३	(12) note	is incorrect.	we have adopted.
८८	४, ६	गुणपचसम	गुणवयसमं
९०	२, ५	मोदितम्	मर्द्दितम्
,,	९	चिंचा	विद्रा
,,	१२	सूरणकन्दसम्पुटे	सूरणसंपुटेन
९९	१०	गिलावदातुक धात	शिलावघरसुगन्धानां

Page	Line	For	Read
१०१	५	सारयेत्	मारयेत्
१०४	७	कोकिलात्रयम्	कोकिलत्रयम्
१०६	५	लघुकन्दरदो	लघुकन्दरसो
,,	८	लोह	मेह
११७	१	च पडालकम्	चपलालयम्
,,	५	गोरसोनं	गोरसना
११८	७	हयगन्धाहुतालकैः	हयगोधीहृतालकैः
१२२	५	कटुपञ्चकम्	पटुपञ्चकम्
,,	८	षड्बिन्दुर्द्विमुखो तथा	षड्विधा द्विमुखास्तथा
१२६	११	श्वेतपीतारुणः सिते	श्वेतपीतारुणासिते
१३०	७	स्वर्ण	चूर्णं
१३१	१०	च नरीकेश	चामरीकेशं
१३२	१०	लाचारसनिभं	लाचाभं निर्मलं
१३४	८	घर्षेत्	चिपेत्
,,	११	गतै	गर्भे
,,	१२	तदेतद्द्विष्टिकास्तम्भे	एतदेकाग्निकस्तम्भो
१३५	८	चापितं भस्मवत्	चापि शतशः
,,	११	शिलासुत	शिलासत्त्व
१३६	२	शतसद्गुणे	शतशो गणे
१३७	१	शिलावाद्यं	शिलावापं

Page	Line	For	Read
१२७	३	योपासृष्टस्य	घोपकृष्णस्य
,,	५	खादति	वापितं
,,	,,	विना	विपम्
१२८	७	काक	शाक
,,	८	कोरण्डकस्य	कौरण्डकेन
,,	१०	च त्रिगुणया	त्रिगुणेनैव
,,	११	वापयित्वा	म्रावयित्वा
१२९	१	द्रव	द्दं
१४२	११	माचिकम्	मोघकम्
१४८	४	घकम्पय	सकम्पय
१४९	४	वसुभण्डादिभि	वसुद्दादिभि
१५३	५	मूलत्वात्	मूलस्थं
,,	९	मतभावं	भाभभावं
१५५	४	लब्धापायो	लब्धमायो
१६२	६	वक्षीपुपुङ्काया	सितेपुपुङ्काया
१६३	२	नागमुण्डी	नागशुण्डी
,,	११	करकाभ्रकम्	भास्कराभ्रकम्
१६५	१२	धारयेत्	जारयेत्
,,	१३	कट्टम्ल	पट्टम्ल
१६६	३	जायते	जार्यते

Page	Line	For	Read
१६६	५	प्राणेन	कोष्णेन
,,	११	वासवाश्च	वेतसाश्च
,,	१२	दुग्धोर्णा	दग्धोर्णा
१६८	३	मतिमात्मनः	गतिमात्मनः
१७०	३	सण्भद्रस	मधुहृदय
१७१	१	तया रत्नं	रत्नगर्भं
१७२	६	महाजारसमायुक्तं	महाजारणमिश्रयुक्तं
,,	८	पद्मरागप्रलेपेन	पद्मरागं प्रयत्नेन-
१७३	१०	पादितं	पाचितं
१७४	११	विड़ाग्निना	दृढ़ाग्निना
१७५	१	मार्द्रपिण्डे नपुंसकम् ।	मार्द्रपिण्डेन संयुतः ।
,,	२	पाचयेद्	तृतीये
,,	३	दोलायन्त्रविचक्षणः	दोलायन्त्रे विचक्षणः
,,	६	यावदार्द्रक	प्राग्वदार्द्रक
१७६	४	महाजारसमन्विताम्	महाजारणसंयुताम्
१८२	१	च पक्षालयम्	चपलालयम्
१८४	७	सिद्धवली	सिद्धवली
१८७	५	विवारनाम	विचारनाम
१८८	१	वह्निशिखा	वह्निशिखा
१९०.	८	यदा लक्षणमिदि च	कथ्यते सैन्धवं यथा

Page	Line	For	Read
१८४	८	प्रयोगो	प्रयागो
„	९	तस्यासने	तस्य मध्ये
२१०	२	नैव वाइस्तु	न च वा भस्म
२२१	३	यथा याह्य	तथा गुह्यं
२२४	१	तापयेद्भूगतं	तापयेद्भूमितः
२४१	१	तारताम्राणि	तारपत्राणि
२०६	४	प्राकार	प्रकाश
२७७	९	त्रप	त्रय
२९५	९	द्रव	द्रव्य
३१०	५	भूपा	मूपा
३१२	३	रसयेव	रसायासा
„	४	यन्धकर्पानन्मस्तथा	भध कुर्यादयामलम्
„	८	जले	मले
३१७	५	वसुभद्द	वसुद्दद
३३८	११	पुष्प रम	पुष्पैरय
३४०	५	दीनारी	वाराही
३४२	९	कोकिला करवोर च	कोकिलाक्षकवीजञ्च
३४४	३	पिष्टि	सृष्टि
३५३	५	यच्चस्त्री	महाम्भोपरमन्तोदयन्तो
३६१	१	वज्रतोयं कपालो	वज्रतोयकपाली

Page	Line	For	Read
३६२	१	वैक्राम्लं नागकापाली	वैक्रान्तनागकापाली
,,	११	रविनागं कपाली	रविनागकपाली
३७०	७	पुटवेधकम्	याममात्रकम्
,,	१२	द्रुग्धर्म्मांश	द्रुमधर्म्मांय
३७१	५	चित्रधर्म्मा	पीतधर्म्मा
,,	७	धर्म्मसुधा	घर्मसुधा
,,	१२	कारयेद्दलधर्म्मीय	कारयेत्तद्दलं घर्मे
३८८	१	शिशुपश्चाङ्गुली	शिशुः पश्चाङ्गुली
३९१	४	चौरे चार्कस्य	चौरेणार्कस्य
३९२	४	पाचयेद्तुजाम्लेन	पाचयेद्भुजाम्लेन
,,	१५	[घतुज may mean मध्यम.]	
४०९	८	पर्णेषु	पर्णेषु
४१९	१२	चारविल्वञ्च	चिरविल्वञ्च

रसार्णवम् ।



ॐ श्रीगणेशाय नमः ।

प्रथमः पटलः ।

यस्मिन् सर्व्वं यतः सर्व्वं यः सर्व्वं सर्व्वतश्च यः ।
यश्च सर्व्वमयो नित्यः तस्मै सर्व्वात्मने नमः ॥ १ ॥[1]
कैलासशिखरे रम्ये नानारत्नविभूषिते ।
नानाद्रुमलताकीर्णे शुभसम्बन्धवर्जिते ॥ २ ॥
देवदेवं सुखासीनं नीलकण्ठं त्रिलोचनम् ।
प्रणम्य शिरसा देवी पार्व्वती परिपृच्छति ॥ ३ ॥

श्रीदेव्युवाच ।

देवदेव महादेव काल कामाङ्गदाहक ।
कुलकौल-महाकौल सिद्धकौलादिनाशन ॥ ४ ॥

---

(1) The portion from the first sloka to the first hemistich of the 54th is wanting in the Bikánir MS. (B) Slokas from the first to the 43rd are wanting in the Madras MS. (M)

त्वत्प्रसादाच्छ्रुतं सर्व्वं मयैवमवधारितम् ।
यदि तेऽहमनुग्राह्या यद्यहं तव वल्लभा ॥ ५ ॥
सूचिता सर्व्वतन्त्रेषु या पुनर्न प्रकाशिता ।
जीवन्मुक्तिरियं नाथ कीदृशी वक्तुमर्हसि ॥ ६ ॥

श्रीभैरव उवाच ।

साधु साधु महाभागे साधु पर्व्वतनन्दिनि ।
साधु पृष्टं त्वया देवि भक्तानां हितकाम्यया ॥ ७ ॥
अजरामरदेहस्य शिवतादात्म्यवेदनम् ।
जीवन्मुक्तिर्महादेवि देवानामपि दुर्ल्लभा ॥ ८ ॥
पिण्डपाते च यो मोक्षः स च मोक्षो निरर्थकः ।
पिण्डे तु पतिते देवि गर्द्दभोऽपि विमुच्यते ॥ ९ ॥
यदि मुक्तिर्भगक्षोभैः किं न मुच्यन्ति[1] गर्द्दभाः ।
अजाद्य वृषभादेव किन्न मुक्ता गणाम्बिके ॥ १० ॥
तस्मात् संरक्षयेत्[2] पिण्डं रसैरेव रसायनैः ।
शुक्रमूत्रपुरीषाणां यदि मुक्तिर्निषेवणात् ॥ ११ ॥
किन्न मुक्ता महादेवि श्वानशूकरजातयः ।
षड्दर्शनेऽपि मुक्तिस्तु दर्शिता पिण्डपातने ॥ १२ ॥
करामलकवत्[3] सापि प्रत्यक्षं नोपलभ्यते ।
अकथ्यमपि देवेशि सद्भावं कथयामि ते ॥ १३ ॥

---

(1) [illegible] Ms (K) reads [illegible], which is incorrect. (2) [illegible] reads [illegible] (3) K reads [illegible], which is inaccurate.

शून्यपापो मन्त्रयाजी[1] न पिण्डं धारयेत् क्वचित् ।
देवानामपि देवेशि दुर्लभं पिण्डधारणम् ॥ १४ ॥
किं पुनर्मानुषाणान्तु धरणीतलवासिनाम् ।
धर्मे नष्टे कुतो धर्मः धर्मे नष्टे कुतः क्रिया ॥ १५ ॥
क्रियानष्टे[2] कुतो योगः योगे नष्टे कुतो गतिः ।
गतिनष्टे[2] कुतो मोक्षो मोक्षे नष्टे न किञ्चन ॥ १६ ॥
(तेन पिण्डो महाभागे रक्षणीयः प्रयत्नतः ॥)[3]

श्रीदेव्युवाच ।

जीवन्मुक्तिस्वरूपं तु देवदेव श्रुतं मया ।
तत्प्रत्युपायं मे ब्रूहि यद्यस्ति करुणा मयि ॥ १७ ॥

श्रीभैरव उवाच ।

कर्मयोगेन देवेशि प्राप्यते पिण्डधारणम् ।
रसश्च पवनश्चेति कर्मयोगो द्विधा मतः[4] ॥ १८ ॥
मूर्च्छितो हरते व्याधिं[5] मृतो जीवयति स्वयम् ।
बद्धः खेचरतां कुर्यात् रसो वायुश्च भैरवि ॥ १९ ॥[6]
ज्ञानान्मोक्षः सुरेशानि ज्ञानं पवनधारणात् ।

---

(1) K reads शून्यपापामन्त्रयाजी which seems to be grammatically incorrect (2) क्रियानष्ट=क्रियानाशे, गतिनष्ट=गतिनाशे [नपुंसके भावे क्त] K reads गतौ नष्टे, which is inc. (3) K adds the line within brackets without affixing a serial number to it (4) र द स and रसेन्द्रचिन्तामणि read मतं (5) र द स reads हरति व्याधीन् (6) The 18th and the 19th ślokas are quoted in र द स

तत्र देवि स्थिरं पिण्डं यत्र स्थैर्य्यं रसः प्रभुः ॥ २० ॥
अचिराज्जायते देवि शरीरमजरामरम् ।
मनसश्च यथा ध्यानं[1] रसयोगादवाप्यते ॥ २१ ॥
सत्यं स[2] लभते देवि ज्ञानं विज्ञानपूर्व्वकम्[3] ।
तस्य[4] मन्त्राश्च सिध्यन्ति योऽश्नाति[5] मृतसूतकम् ॥ २२ ॥
यावन्न शक्तिपातस्तु न यावत् पाश[6]कृन्तनम् ।
तावत्तस्य कुतो बुद्धिः[7] जायते मृतसूतके ॥ २३ ॥
मद्यमांसरता नित्यं भगलिङ्गेषु ये रताः ।
तेषां विनष्टबुद्धीनां रसज्ञानं सुदुर्ल्लभम् ॥ २४ ॥
कुलशासनहीनानां सद्दर्शनमकाङ्क्षिणाम् ।
न सिध्यति रसो देवि पिबन्ति मृगतृष्णिकाम् ॥ २५ ॥
गोमांसं भक्षयेद्यस्तु पिबेदमरवारुणीम् ।
कुलीनं[8] तमहं मन्ये रसज्ञमपरेऽधमाः ॥ २६ ॥
न गर्भः संप्रदायार्थे[9] रसो गर्भो विधीयते ।
तेनायं लभते सिद्धिं न सिद्धिः सूतकं विना ॥ २७ ॥

---

(1) र चि reads समाधानम् (2) सत्यम्, a variant in र चि. (3) र. चि reads विज्ञानं ज्ञानपूर्व्वकम् (4) सत्य, a variant in र चि. which is not appropriate here (5) K reads अश्नुते in the sense of अश्नाति. (6) र. चि reads शक्ति, which is tautological. (7) र चि. reads शुद्धि. (8) अहं तं कुलीनं कुकार्यलीनं कदाचारं मन्ये, कुलीनशब्दादुत्पन्नं कौलीनं लोकनिन्दा इत्यर्थः। अन्ये अधमाः न रसज्ञा भवन्ति इत्यर्थः। (9) We have adopted the reading in र चि.

यावन्न हरबीजन्तु भक्षयेत् पारदं रसम् ।
तावत्तस्य कुतो मुक्तिः कुतः पिण्डस्य धारणम् ॥ २८ ॥[1]
मद्यमांसरताभ्रष्टा[2] मोहिताः[3] शिवमायया ।
जल्पन्ति च वयं मुक्ता यास्यामः शिवमन्दिरम् ॥ २९ ॥
पिण्डधारणयोगे च निस्पृहा मन्दबुद्धयः ।
खण्डज्ञानेन देवेशि वञ्चितं सचराचरम् ॥ ३० ॥
स्वदेहे खेचरत्वं च शिवत्वं येन लभ्यते ।
तादृशे तु रसज्ञाने नित्याभ्यासं कुरु प्रिये ॥ ३१ ॥

श्रीदेव्युवाच ।

अवतारं रसेन्द्रस्य माहात्म्यं तु सुरेश्वर ।
श्रोतुमिच्छामि देवेश वक्तुमर्हसि तत्त्वतः ॥ ३२ ॥

श्रीभैरव उवाच ।

साधु पृष्टं महाभागे गुह्याद्गुह्यतरं त्वया ।
अनुग्रहकरं ध्यानं लोकानामुपकारकम् ॥ ३३ ॥
त्वं माता सर्व्वभूतानां पिता चाहं सनातनः[4] ।
द्वयोश्च यो रसो देवि महामैथुनसम्भवः ॥ ३४ ॥
खैरतः सम्भवाद्देवि[5] पारदः कीर्त्तितो महः[6] ।

---

(1) र. चि. exactly quotes this śloka. (2) K reads मद्यमांसरतां भ्रष्टा, which is inc. (3) K reads मोहिता, which seems to be an error of the scribe. (4) K reads सनातनम्, which is inc. This śloka (34th) is also found in र. चि. (5) K reads खेरतश्चसतोदेवि, which is absurd, being gram. untenable (6) K reads महा, which is inc.

पारदो गदितो यश्च परार्थं साधकोत्तमैः ॥ ३५ ॥
सूतोऽयं[1] मत्समो देवि मम प्रत्यङ्गसम्भवः ।
मम देहरसो यस्मात् रसस्तेनायमुच्यते[2] ॥ ३६ ॥
दर्शनात् स्पर्शनात् तस्य भक्षणात् स्मरणादपि[3] ।
पूजनाच्च प्रदानाच्च[4] दृश्यते षड्विधं फलम् ॥ ३७ ॥
केदारादीनि लिङ्गानि पृथिव्यां यानि कानि च[5] ।
तानि दृष्ट्वा तु यत्पुण्यं तत्पुण्यं रसदर्शनात् ॥ ३८ ॥
चन्दनागुरुकर्पूरकुङ्कुमान्तर्गतो रसः ।
मूर्च्छितः शिवपूजायां[6] शिवसान्निध्यसिद्धये ॥ ३९ ॥
भक्षणात् परमेशानि हन्ति पापत्रयं रसः ।
तथा तापत्रयं हन्ति रोगान् दोषत्रयोद्भवान् ॥ ४० ॥
दुर्लभं ब्रह्मनिर्वाणं[7] प्राप्यते परमं पदम् ।
हृद्व्योमकर्णिकान्तःस्थं रसेन्द्रस्य महेश्वरि ॥ ४१ ॥[8]
स्मरणान्मुच्यते[9] पापैः सद्यो जन्मान्तरार्जितैः ॥ ४२ ॥
स्वयम्भूलिङ्गसाहस्रैः[10] यत्फलं सम्यगर्चनात् ।

---

(1) स द स reads सूतोऽयम् (2) K reads रसमेनं समुच्यते, which ... gram inc. We have adopted the variant in स द स (3) र चि... reads स्मरणात् प्रिये (4) स द स reads पूजनात् रसदानाच्च This variant exactly agrees with that in र चि (5) स द स and र चि rea... कानिचित् (6) शिवपूजा सः, a variant in र चि (7) र चि reads ब्रह्मनिर्वाणं (8) The reading in र चि is as follows —हृद्व्योमकर्णिका... न्तःस्थं रसेन्द्र परमेश्वरि (9) स्मरन् विमुच्यते, a variant in र चि (10) K reads ...साहस्रैः, which is inc

तत्फलं कोटिगुणितं रसलिङ्गार्चनाद्भवेत् ॥ ४३ ॥
अधमः खगवादस्तु[1] बिलवादस्तु मध्यमः ।
उत्तमो मन्त्रवादस्तु रसवादो महोत्तमः[2] ॥ ४४ ॥
मन्त्रतन्त्रपरिज्ञाने रसयोगस्य[3] दूषकाः[4] ।
प्रयान्ति नरकं[5] सर्वे हित्वा सुकृतसञ्चयम् ॥ ४५ ॥
रसविद्या परा विद्या त्रैलोक्येऽपि सुदुर्लभा[6] ।
भुक्तिमुक्तिकरी यस्मात् तस्माद्देया गुणान्वितैः ॥ ४६ ॥[7]
अस्तीति भाषते कश्चित् कश्चिन्नास्तीति भाषते ।
आस्तिके तु भवेत्सिद्धिः[8] तस्य सिद्ध्यति भूतले ॥ ४७ ॥
नास्तिकेनानुभावेन[9] नास्ति नास्तीति यो वदेत् ।
तस्य नास्ति प्रिये सिद्धिर्जन्मकोटिशतैरपि ॥ ४८ ॥
ब्रह्मज्ञानेन मुक्तोऽसौ पापी यो[10] रसनिन्दकः ।

---

(1) M reads खनयवादस्तु रससार reads गुप्यवाद in place of खगवाद, and चित्रवाद in place of बिलवाद (2) रसवादोत्तमोत्तम, a variant in M, which is gram inc (3) रसो योगस्य, a variant in K, which seems to be inc M reads रसवादस्य (4) K reads दूषक, which is inc M reads भूपका, which deteriorates the sense (5) K reads रसक, which has no sense here (6) M reads च दुर्लभा, which agrees with र चि (7) भुक्ति मुक्तिकरी यस्मात् तस्माज्ज्ञेया गुणान्विता is the reading in र चि (8) अस्तीति भाषते यस्तु, a variant in M (9) नास्तिकेन तु वादेन, a variant in M. (10) M reads पापीयान् सोऽयुक्तो च पापी, a variant in र चि

नाहं त्राता भवे तस्य[1] जन्मकोटि[2]शतैरपि ॥ ४९ ॥
श्वानोऽयं जायते देवि यावत्[3] जन्मसहस्रकम् ।
त्रिकोटिजन्मलक्षाणि मार्जारो जायते रसात् ।
रासभो लक्षजन्मानि लक्षजन्मानि वायसः ॥ ५० ॥[4]
क्रमिको लक्षजन्मानि कुक्कुटो[5] जन्मलक्षकम् ।
गृध्रको लक्षजन्मानि यः पापी रसनिन्दकः ॥ ५१ ॥
आलापं गात्रसंस्पर्शं यः कुर्याद्रसनिन्दके ।
यावज्जन्मसहस्रं तु स भवेद्दुःखपीड़ितः ॥ ५२ ॥[6]
रसवीर्यविपाके च सूतक[7]स्त्वमृतोपमः ।
तेन जन्मजराव्याधीन्[8] हरते सूतकः प्रिये ॥ ५३ ॥
गुरुमाराधयेत् पूर्व्वं विशुद्धेनान्तरात्मना[9] ।
संप्रदायं प्रयच्छन्ति[10] गुरौ तुष्टे मरीचयः ॥ ५४ ॥

---

(1) K reads भवेत्तस्य , so also र चि M reads भवेत्तस्य Both are gram inc The correct reading is either भवाम्यस्य or भवे तस्य (2) K reads जन्मकोटी (3) श्वयान्यो जायते सोऽपि यावत्, a variant in M. (4) Slokas 50—52 are wanting in M The sense of रसात् is not accurate (5) कुक्कट, a variant in K, is palpably an error of the scribe. (6) The hemistich as quoted in र चि is as follows —यावज्जन्मसहस्राणि स भवेत् पापपीड़ित. (7) रसो वीर्य्यं विपाके चा पारद, a variant in M, which is gram. inc. (8) M reads जन्मजराव्याधी (9) This charana is wanting in M. (10) M reads सम्प्रदायमप्रच्छन्ति, which has no sense here

गुरुसेवा विना कर्म्म य कुर्य्यान्मूढचेतनः[1] ।
स याति निष्फल कर्म्म[2] स्वप्नलब्धं धनं यथा[3] ॥ ५५ ॥
य. कर्म्म कुरुते दृष्ट तस्य लाभ.[4] पदे पदे ।
कारयेद्रसवादन्तु तुष्टेन गुरुणा प्रिये ॥ ५६ ॥
सिद्धुपायोपदेशोऽयमुभयोर्भोगमोक्षद ।[5]
रसार्णवं महातन्त्र[6]मिद परमदुर्लभम् ॥ ५७ ॥
गोप्य गुरुप्रसादेन लब्ध स्यात् फलसिद्धये ।[7]
लब्ध्वा च[8] रसकर्म्माणि नाहङ्कार समाचरेत् ॥ ५८ ॥
अनुज्ञातय गुरुणा लब्ध्वा चाज्ञा रसाङ्कुशीम् ।[9]
भैरवीं तनु[10]माश्रित्य साधयेद्रसभैरवम् ॥ ५९ ॥
एवमुक्ता रसोत्पत्ति. माहात्म्यञ्च[11] सुरेश्वरि ।
तन्ममाचक्ष्व[12] देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ ६० ॥

---

(1) B reads विन which is inc मूढचेतसा a variant in M (2) B and M read कर्म्म (3) B reads यथा धन M reads स्वप्न लब्धं यथा धनम् which is senseless. (4) B and K read लाभ, which is gram. inc M reads पाप which is absurd (5) B reads मोक्षयो This hemistich is wanting in M. (6) रसार्णवमिद तन्त्रम् a variant in M (7) This hemistich is wanting in M (8) लब्ध्वा तु a variant in M (9) B reads लब्ध्वा चाज्ञ This hemistich is wanting in M (10) B reads भैरवीतनु K reads भैरवीमनु (11) K reads रसोत्पत्ति महात्मञ्च which is inc. (12) B reads समाचक्ष्व, which is inc. This hemistich is wanting in M

इति श्रीपार्व्वतीपरमेश्वरसंवादे[1]
रसार्णवे रससंहितायां[2]
तन्त्रावतारो नाम[3]
प्रथमः पटलः ॥१॥

द्वितीयः पटलः ।

श्रीदेव्युवाच ।

रसोपदेशदाता च[1] कथं स्याद्वद मे[2] प्रभो ।
शिष्यश्चैव कथं[3] देव रसानुष्ठानतत्परः ॥ १ ॥

श्रीभैरव उवाच ।

निस्पृहो निरहङ्कारी लोभमायाविवर्ज्जितः ।
कुलमार्गरतो नित्यं गुरुपूजारतश्च यः ॥ २ ॥[4]

---

(1) श्रीपार्व्वतीपरमेश्वरसंवादे is wanting in M (2) रससंहितायां is wanting in M (3) B reads रसावतारो नाम

---

(1) K reads रसोपरसदाता We have adopted partly the reading in B and that in M. (2) कथं मम वद, a variant in B and M. (3) K reads रस, which is senseless (4) B reads षट्कपूजा instead of गुरुपूजा This śloka is wanting in M.

शान्तः शिष्योपदेशज्ञ.[1] शक्तिमान् गतमत्सरः[2] ।
धर्मज्ञः सत्यवाक् दक्ष. शीलवान् गुणवान् शुचि ॥ ३ ॥
अनेकरसशास्त्रज्ञो रसमण्डपकोविद ।[3]
रसदोषाविधानज्ञो यन्त्रौषधि[4]महारसान् ॥ ४ ॥
रागसख्या[5] वीजकला द्वन्द्व[6]मेलापनं विडम् ।
रञ्जन[7] सारण तैल[8] दलानि क्रामणानि च[9] ॥ ५ ॥
वर्णोत्कर्ष[10] मृदुत्वञ्च जारणा बालवृद्धयो.[11] ।
खेचरीं भूचरीं चैव यो वेत्ति स गुरुर्मतः[12] ॥ ६ ॥
देशकालक्रियाभिज्ञो[13] दयादाक्षिण्यसंयुतः ।
लोभमायाविनिर्मुक्तो सन्ध्यानुष्ठानतत्परः ॥ ७ ॥
सामुद्रलक्षणोपेतो गम्भीरो गुरुवत्सल. ।

---

(1) शिष्योविशेषज्ञ , a variant in B शिष्योविनीतश्च, a variant in M Both are inc (2) K reads विमत्सर which breaks the metre We have adopted the reading in M (3) The portion from धर्मज्ञ to कोविद is wanting in M B reads मितवान्, which is inc. (4) B reads दिव्या K reads मन्त्रौषध Both are inc. (5) रागसंख्या, a variant in K (6) B reads विजकला, which is inc. K reads द्वन्द which is a palpable mistake. (7) M reads रञ्जक (8) तैला a variant in K (9) K reads बलाग्निक्रम णानि च दलानीकामणानि च, a variant in M, which seems to be inc. (10) K reads वर्णोत्कर्षं, which is gram. inc. (11) जारणावृद्धयो, a variant in K (12) B has खचरि, and भूचरि, which are inc. खचरीश्चैव यो वेत्ति भूचरीं स गुरुर्मतेत् a variant in M (13) देशकालक्रियाभिज्ञ, a variant in K, which cannot be reconciled without the word गुरु to be understood.

देवाग्नि[1]योगिनीचक्र कुलपूजारतः सदा ।
शिष्यो विनीतस्तन्त्रज्ञः सत्यवादी दृढव्रतः ॥ ८ ॥[2]
ये नरा.[3] कुम्भकुद्दाल ध्वजशंखादिलाञ्छितैः[4] ।
करै[5]रधिष्ठिता देवि योज्यास्ते निधिसाधने[6] ॥ ९ ॥
बलवन्तो महासत्वाः[7] कृष्णरक्त[8]विलोचनाः ।
वक्रघोणाः[9] सदा[10] क्रूराः प्रशस्ता बिल[11]साधने ॥ १० ॥
निर्मांस[12]मूर्द्धपिण्डोकान्[13] रक्तकेशान् गतालसान्[14] ।
कठिनानुपपादाय[15] धातुवादे[16] नियोजयेत् ॥ ११ ॥
आदौ परीक्षयेद्देवि साधकान्[17] सुसमाहितान् ।
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्चानुक्रमेण तु[18] ॥ १२ ॥
जितेन्द्रियाः क्लेशसहा नित्योद्यमसमन्विताः ।

(1) K reads देवाग्नौ, which is inc. (2) K reads सिद्धो instead of शिष्यो The portion beginning from सोमसायाविनिमज्जो and ending in सत्यवादी दृढव्रत is not to be found in M (3) K reads नरा (without विसर्ग), which is absurd and inc. (4) B reads लाञ्छनै K reads सवचै (5) M reads नरै, which is inappropriate. (6) निधिदर्शने, a variant in M (7) K reads महासाद्, which is gram inc. (8) B reads कृष्णारक्त (9) K reads वक्रघोरा (10) सदा, a variant in K, which is meaningless. (11) K reads किल which is a mere expletive. (12) K reads निर्मांसाः (13) B reads मूर्द्धपिण्डोक M reads मूर्द्धफलिकाद् (14) K reads रक्तकेशाड्गालिका (15) K reads कठिनानुपपादाय कठि नानुप य, an incomplete variant in M (16) K reads धातोर्वादे (17) M reads साधनान्, which is gram inc. (18) ब्राह्मण क्षत्रियं वैश्य शूद्र चानुक्रमेण तु, a variant in K. M has च instead of तु

शूराश्च क्षतविद्याश्च प्रगल्भाः[1] साधकाः प्रिये ॥ १३ ॥
रसदीक्षाविहीना ये[2] भोक्तलक्षणवर्जिताः ।
विघ्नासक्ताः पापरता[3] वर्जयेत्तान्[4] प्रयत्नतः ॥ १४ ॥
दुश्चारिणी दुराचारा निष्ठुरा कलहप्रिया ।
बह्वाशिनी[5] च दुश्चित्ता कोटराक्षी च निर्दया ।
रसनिन्दाकरी या च तां नारीं परिवर्जयेत् ॥ १५ ॥
ईदृशीभिर्वरारोहे[6] सम्पूर्णं क्षितिमण्डलम् ।[7]
न तादृशी[8] भवेन्नारी यादृशी रसबन्धकी ॥ १६ ॥[9]
काकिणी कोकणी नारी तथैव काञ्चिकाचिनी ।[10]
कृष्णपक्षे ऋतुमती सा नारी काकिणी स्मृता ॥ १७ ॥
उभयपक्षे ऋतुमती सा नारी कोकणी मता[11] ॥ १८ ॥
शुक्लपक्षे ऋतुमती सा नारी[12] काञ्चिकाचिनी ॥ १९ ॥

---

(1) K reads विज्ञेयाः. The portion commencing from the 14th śloka and ending in the first hemistich of the 45th is wanting in M. (2) K reads रसा दीक्षाविहीनाश्च (3) K reads भवेच्चरसान्यायरताः. (4) K reads वर्जयेत्तान्, which is gram. inc. (5) B reads बहुकामिनी (6) K reads ईदृशी, which is palpably inc. (7) K has सम्पूर्णक्षितिमण्डले. (8) K reads तादृशी च (9) Cf रसरत्नसमुच्चय, Chap VI ślokas 34—38. (10) काकणी काञ्चिकाचीति कोकणी, a variant in K, which we have not adopted for its deficiency in words and defect in metre. The B reads कालिनी in lieu of काञ्चिनी (11) उभयपक्षे ऋतुमती सा कोकणी, a variant in K, where some words are wanting (12) This word is not found in K. The ślokas 17—19 are not found in B.

नवयौवनसम्पन्ना सुरूपा चारुहासिनी ।
सूक्ष्मकेशा तु या नारी घोराहारप्रिया सदा ॥ २० ॥
प्रियालापकरी[1] नित्यं शिवशास्त्रकथाप्रिया ।
पद्माकार[2] मुखं यस्या दृष्टिरिन्दीवराकृतिः ॥ २१ ॥
दशना वज्रसदृशा. प्रवालसदृशोऽधरः[3] ।
यस्याः पयोधरौ देवि तुङ्गपीनौ समावुभौ ॥ २२ ॥
अश्वत्थपत्रसदृशो योनौ यस्या भग समः ।[4]
यत्पादौ मांसलौ स्निग्धौ वर्त्तुलावल्परोमकौ[5] ॥ २३ ॥
श्यामा च मध्ये वामा च[6] तन्वी भक्तिपरा[7] शिवे ।
पद्मिनी सा तु विज्ञेया प्रसवा[8] मृगलोचना ॥ २४ ॥
पूर्णिमायाममायां वा पक्षे पक्षे रजस्वला ।
षड्भिदा काकिणी नाम्ना पूर्व्वप्रोक्ता रसप्रदा ॥ २५ ॥[9]
यस्य तुष्टो महादेवस्तस्य सिद्धो[10] रसायने ।
तथैव[11] देवदेवेशि रसकर्म्माणि कारयेत् ॥ २६ ॥

---

(1) [illegible] a variant in K, which is inc. (2) K. has [illegible] (3) B reads [illegible] K. has [illegible], which seems to be inc. (4) [illegible], a variant in [illegible] (5) [illegible] a variant in L (6) [illegible], a variant in K. (7) [illegible] a variant in K, which is inc (8) L reads [illegible] (9) The 25th śloka is not found in B (10) B reads [illegible] K. reads [illegible], which is gram. inc. (11) K. reads [illegible]

तस्य हि निर्म्मला बुद्धिर्निश्चिता रससाधने ।
तस्माद्गुरुश्च शिष्यश्च पूर्व्वोक्तः सिद्धिभाग्भवेत् ॥ २७ ॥

श्रीदेव्युवाच ।

ईदृशैर्लक्षणै.[1] नारीं कुतः प्राप्नोति साधकः ।
यत्र रूपं महादेव लक्षणं नात्र विद्यते ॥ २८ ॥
लक्षणं विद्यते यत्र भावना नात्र विद्यते ।
अथवा रूपहीनाया रूपं केन प्रवर्त्तते ॥ २९ ॥
लक्षणत्रितय[2] कुत्र त्वया दृष्टं महेश्वर ।
तदेतज्ज्ञायते येन तमुपायं वद प्रभो[3] ॥ ३० ॥

श्रीभैरव उवाच ।

शृणु देवि परं गुह्यं यत्सुरैरपि दुर्लभम् ।
पितुः सदाशिवाज्जात[4] जन्म यश्चण्डिकोदरे ॥ ३१ ॥
तासां बुद्धिर्भवेद्देवि निर्म्मला रससाधने ।
दापयेत्त्वरितामन्त्र जपेत्त[5] दर्पवर्जिता[6] ॥ ३२ ॥
लक्षमन्त्र[7] जपेद्द्या तु जायते सा सुलक्षणा ।
बद्ध्वा तु खेचरी मुद्रां जपेत् फेट्कारभैरवीम् ॥ ३३ ॥

---

(1) ईदृशीं लक्षणां, a variant in K, which is gram untenable [Here उपलक्षिता is to be understood] (2) K reads लक्षण त्रितय (3) K reads तदुपायं वद मे प्रभो, where the word मे can be left out in order to keep up the metre (4) The reading in K is gram inc., the text runs thus —पितुः सदाशिवाख्याय तस्यायाश्चण्डिकोदरे (5) [Here सा is to be understood]• (6) स जपेद्दर्पवर्जिता is the reading in B (7) B reads लक्षमात्र

ममेयं[1] चण्डिका माता जाता च त्रिपुरान्तकात्[2] ।
कालिकाहं समुद्भूताश्चोद्दृशं संचरेत्तु[3] सा ॥ ३४ ॥
भूतं भव्यं भविष्यञ्च त्रैलोक्ये[4] कथयेत्तु सा ।
सहायास्तादृशास्तस्य यादृशी भवितव्यता ॥ ३५ ॥[5]

श्रीदेव्युवाच ।

देवदेव महादेव समस्तज्ञानभाजन ।
रसदीक्षां तु पृच्छामि साधकानां हिताय वै ॥ ३६ ॥

श्रीभैरव उवाच ।

शृणु भैरवि यद्भावम्[6] अपूर्वं वर्णयामि ते ।
रसदीक्षाविधानन्तु[7] तस्माद्विगदितं शृणु ॥ ३७ ॥
यत्र राजा नयपरो[8] बलवान् धर्म्मतत्परः ।
मन्त्री च धर्म्मतत्त्वज्ञो भक्तिश्रद्धासमन्वितः ॥ ३८ ॥
तत्रेदं कारयेत् कर्म्म रसबन्धं रसायनम् ।
जना माहेश्वरा यत्र तत्र स्थाने[9] तु कारयेत् ॥ ३९ ॥

---

(1) After the 33rd śloka we find a hemistich in B, which runs thus —यदा प्रवर्त्तते भावो जन्म करोति मानुष, we have rejected it, since the 34th śloka serves the same purpose. K reads ममेयं. (2) K reads त्रस्तान्तका, which is inc. (3) K reads सञ्चरंतु सा, which is gram. inc. (4) B has भूतं च भवद्भविष्य च which mars the metre. K reads त्रैलोक्य which is inc. (5) After the 35th śloka we have the following hemistich in B —रसदीक्षां विधास्येऽहं यस्मात् कर्म समाचरेत् । We have rejected it, because रसदीक्षाविधान is not yet explained. (6) K reads वदन्ति. (7) Cf. र. र. स. Chap. VI ślokas 12—66. (8) K reads नयवरो. (9) K reads माहेश्वराश्च मठे तु.

कारयेद्विजने स्थाने पशुयंच न विद्यते ।
सुगुप्ते सुयमे स्थाने सर्व्वबाधाविवर्ज्जिते ॥ ४० ॥
प्राकार[1]परिखोपेते कपाटार्गलरचिते ।
एकान्ते निर्म्मले हृद्ये नानापुष्पद्रुमान्विते ॥ ४१ ॥
हंसकारण्डवाकीर्णे चक्रवाकोपशोभिते ।
दिव्यौषधिगणोपेते सजले श्यामशाद्वले[2] ॥ ४२ ॥
कुमुदोत्पलकह्लार कदलीषण्डमण्डिते ।
चित्रिते[3] भवनोद्याने कारयेत् परमेश्वरि ॥ ४३ ॥
तन्मध्ये देवदेवेशि मत्तवारणसंयुतम्[4] ।
वातायनसमोपेतमूर्द्धनिर्गामिधूमकम्[5] ॥ ४४ ॥
रत्न[6]पताकासंयुक्तं सर्व्वोपकरणं तथा ।
प्रविभक्तौषधितुपा[7]काष्ठारण्योत्पलालयम्[8] ॥ ४५ ॥
समालिखितदिग्देवं[9] समर्च्चितविनायकम्[10] ।

(1) K reads प्रकार, which seems to be an error of the scribe.
(2) K reads स्यात् ससाह्वले, wherein the first word (स्यात्) is redundant.
(3) B reads चित्रते (4) यन्त्रोद्वार तु कारयेत्, a variant in K, which seems to be unconnected (5) K reads निष्काम instead of निर्गाम.
(6) B reads रत्ना K reads रत्ना, which is inc. (7) K reads प्रविभक्तौषधोत्प, wherein त्प has no meaning (8) काष्ट वन्योत्पमालक, a variant in K, wherein the word काष्ट is an error of the scribe. काष्ठारण्योपलालयम्, a variant in M, wherein some of the terms are inc.
(9) This sloka (46th) is wanting in B K reads दिग्‌द्रव्य, which has no clear meaning (10) M reads विनाकम्, which is a palpable error of the scribe

प्रतिष्ठितमुमेशाख्यां[1] लोकपालैश्च रक्षितम् ॥ ४६ ॥
निर्म्मापयेदेकतलं द्वितलं वापि मण्डपम्[2] ।
अथ पक्षे सिते देवि चन्द्रताराबलान्विते[3] ॥ ४७ ॥
पुण्ये तिथौ मुहूर्त्ते च[4] लग्ने सौम्यग्रहेक्षिते ।
स्नातः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥ ४८ ॥
मधुसर्पिर्दधिक्षीरतिलैः संपूज्य बालिकाः[5] ।
कपिलागोमयालिप्ते हिरण्यकलशावृते ॥ ४९ ॥[6]
यवसिद्धार्थकाम्भोभिः[7] गन्धमाल्योपशोभिते ।
सवेष्टिकाभिः रचिते[8] करपीठे सुरेश्वरि[9] ॥ ५० ॥
शिलापट्टं समुत्कीर्य शिल्पशास्त्रागमं प्रिये ।
न्यासं रसाङ्कुशेनैव कृत्वाङ्गुलिहृदादिषु[10] ॥ ५१ ॥
रसलिङ्गं न्यसेत्तत्र देव्या च[11] सहितं प्रिये ।

---

(1) [illegible], a variant in M, which breaks the metre. (2) B reads मण्डल. M reads मण्डपम् which is an error of the scribe. (3) चन्द्रताराबले [illegible], a variant in B and K. We have adopted the reading in M. (4) पुण्यतिथौ मुहूर्ते तु, a variant in K, which seems to be unconnected. (5) M reads बालका. (6) The portion from स्नात to कलशावृते is wanting in M. (7) B reads यव सिद्धार्थका- [illegible], M reads [illegible], both the readings seem to be erroneous. (8) [illegible], a reading in B. [illegible], a reading in M. (9) K reads [illegible]. [illegible], a variant in M, which has no clear sense. (10) [illegible], a variant in K. [illegible], a reading in M, which seems to be erroneous. (11) K reads [illegible].

ॐ क्लीं ग्लौं[1] मूलराजश्च मूलमन्त्र उदाहृतः ॥ ५२ ॥
तस्मिन् रसाङ्कुशां देवीं[2] मूलेनावाहयेत्प्रिये ।
चतुरस्त्रे तु दिक्पालान्[3] पूजयित्वा बहिः क्रमात् ॥ ५३ ॥
नन्दिनञ्च महाकालं भृङ्गिरीटं महाबलम्[4] ।
कुम्भकर्णञ्च सुग्रीवं भृङ्गीकञ्च[5] दृढायुधम्[6] ॥ ५४ ॥
द्वारे चतुर्षु विन्यस्य पूजयेद्दक्षवामयोः ।
शक्रं पूर्वेऽभि[7]संपूज्य स्कन्दमाग्नेयगोचरे[8] ॥ ५५ ॥
दक्षिणस्यां ततो रुद्रं[9] पवनं नैर्ऋते तथा[10] ।
शिवं पश्चिमभागे तु पावकं वायवे न्यसेत् ।
ऐशानमुत्तरे भागे तु व्यापकं चेशगोचरे[11] ॥ ५६ ॥
लेपिका चेपिका चैव चारिका रञ्जिका तथा[12] ।
लोहिटी बन्धकारी च भूचरी मृत्युनाशिनी[13] ॥ ५७ ॥
विभूतिः खेचरी[14] चैव दश दूत्यः क्रमेण च[15] ।

---

(1) ग्लौं ग्लां क्लीं, a variant in M (2) B reads रसाङ्कुशां M reads रसाङ्कुशं देवीं, which is grammatically inc (3) चतुर० दैशदिकपालान्, a variant in M (4) M reads मनोभवम् (5) B reads भङ्गकञ्च M reads मृगाङ्कञ्च (6) K reads दृढायुधम् which has no clear sense (7) B reads पूर्वेऽपि M reads शक्रं पूर्वे च (8) B reads मारकम्. (9) K reads भद्रं (10) K reads दशेत् (11) B reads चेत् समाचरेत् (12) B has लेपिका रञ्जिका तथा K has लेपिका चेपिका चैव रञ्जिका रञ्जिका तथा (13) लोहिनी बन्धकारी च भूतभूषविनाशिनी, a variant in K. (14) विभूति खेचरी, a variant in K. (15) दशदूत्यक्रमेण च, a reading in M, which is grammatically inc.

प्रतिष्ठितसुमेराख्या[1] लोकपालैश्च रक्षितम् ॥ ४६ ॥
निर्मापयेदेकतलं द्वितलं वापि मण्डपम्[2] ।
अथ पक्षे सिते देवि चन्द्रताराबलान्विते[3] ॥ ४७ ॥
पुण्ये तिथौ मुहूर्ते च[4] लग्ने सौम्यग्रहेक्षिते ।
स्नातः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥ ४८ ॥
मधुसर्पिर्दधिक्षीरतिलैः संपूज्य बालिकाः[5] ।
कपिलागोमयालिप्ते हिरण्यकलसावृते ॥ ४९ ॥[6]
यवसिद्धार्थकास्तीर्णे[7] गन्धमाल्योपशोभिते ।
सचेष्टिकाभिः रचिते[8] करपीठे सुरेश्वरि[9] ॥ ५० ॥
शिलापट्ट समुत्कीर्य शिल्पापट्टार्गलं प्रिये ।
न्यासं रसाङ्कुशेनैव कृत्वाङ्गुलिष्टदादिषु[10] ॥ ५१ ॥
रसलिङ्गं न्यसेत्तत्र ईशा च[11] सहितं प्रिये ।

---

(1) [illegible], a variant in M, which breaks the metre.
(2) B reads मण्डप. M reads मण्डपम् which is an error of the scribe.
(3) चन्द्रताराबले सति, a variant in B and K. We have adopted the reading in M.
(4) पुण्यतीर्थे मुहूर्ते तु a variant in K, which seems to be unconnected.
(5) M reads बालक.
(6) The portion from [illegible] to कलसावृते is wanting in M.
(7) B reads [illegible], M reads [illegible], both the readings seem to be erroneous.
(8) [illegible], a reading in B. [illegible], a reading in M.
(9) K reads [illegible]. [illegible] a variant in M, which has no clear sense.
(10) [illegible] a variant in K. [illegible], a reading in M, which seems to be erroneous.
(11) A reads [illegible]

ॐ क्रीं थीं[1] सूतराजस्य मूलमन्त्र उदाहृतः ॥ ५२ ॥
तस्मिन् रसाङ्कुशो देवी[2] मूलेनावाहयेत्प्रिये ।
चतुरस्रे तु दिक्पालान्[3] पूजयित्वा बहिः क्रमात् ॥ ५३ ॥
नन्दिनञ्च महाकालं भृङ्गिरीटं महाबलम्[4] ।
कुम्भकर्णञ्च सुग्रीवं शङ्कुकर्णञ्च[5] दृढायुधम्[6] ॥ ५४ ॥
द्वारे चतुर्दा विन्यस्य पूजयेद्दक्षवामयोः ।
शैले पूर्वेऽभि[7] संपूज्य स्कन्दमाग्नेयगोचरे[8] ॥ ५५ ॥
दक्षिणस्यां ततो रुद्र[9] पवनं नैर्ऋते तथा[10] ।
शिवं पश्चिमभागे तु पावकं वायवे न्यसेत् ।
धर्मांसुमुत्तरभागे तु व्यापकं चेशगोचरे[11] ॥ ५६ ॥
क्षेपिका चेपिका चैव धारिका रञ्जिका तथा[12] ।
लोहटी वन्यकारी च भूचरी मृत्युनाशिनी[13] ॥ ५७ ॥
विभूतिः खेचरी[14] चैव दश दूत्य. क्रमेण च[15] ।

---

(1) थीं श्रीं क्रीं, a variant in M (2) B reads रसाङ्कुशी M reads रसाङ्कुशं देवी, which is grammatically inc (3) चतुर° वेदिदिक्पालान्, a variant in M (4) M reads महोबलम् (5) B reads शङ्ककर्ण M reads मृगाङ्कञ्च (6) K reads सुधायुधम् which has no clear sense (7) B reads पूर्वेषि M reads पूर्व पूर्वे च. (8) B reads मायरम्. (9) K reads रुद्र (10) K reads यजेत् (11) B reads चेत् समाचरेत् (12) B has क्षेपिका रञ्जिका तथा K has क्षेपिकां चेपिकां चैव रचकां रञ्जिकां तथा. (13) लोहटी वन्यकारी च भूचरमृत्युविनाशिनी, a variant in K. (14) विभूतिं खेचरी, a variant in K. (15) दशदूत्यक्रमेण च, a reading in M, which is grammatically inc.

पूज्यास्त्वष्टदले[1] पद्मे अष्टाधस्तु दलेषु च[2] ॥ ५८ ॥
माक्षिको विमल[3] शैल[4]चपलो रसकस्तथा ।
सस्यको[5] गन्धतालौ च पूर्व्वादिक्रमयोगत ॥ ५९ ॥
अष्टादशभुजा रुद्रा[6] पञ्चवक्त्रास्त्रियम्बका[7] ।
चन्द्रार्द्धशोभिमुकुटा[8] नीलग्रीवा वृषध्वजा[9] ॥ ६० ॥
स्वस्ववर्णधरा[10] सर्व्वेऽप्यष्टविद्येश्वरास्तथा[11] ।
पूजनीया महेशानि द्वितीयेऽष्टदलाम्बुजे[12] ॥ ६१ ॥
कर्णिकायान्तु पूर्व्वादिपूर्व्वं[13] शक्तिचतुष्टयम् ।
शान्तिनी हेमशक्तिश्च परा शक्तिर्मला स्मृता[14] ।
अपरा वज्रशक्तिश्च कान्तिश्चैव परापरम्[15] ॥ ६२ ॥

---

(1) [illegible] is the reading in K. which is a palpable error (2) [illegible] a variant in B [illegible] a variant in M (3) K. reads [illegible] (4) M reads [illegible] which seems to be erroneous (5) [illegible] is the reading in K. and [illegible] is that in M Both are incorrect (6) K. reads [illegible] (without [illegible]). (7) [illegible] (without [illegible]) a variant in K. (8) M reads [illegible]. (9) K. reads [illegible] (without [illegible]) (10) The portion from the first to the first hemistich of the 94th is wanting in B [illegible] a variant in K. which is absurd (11) [illegible] a variant in K. [illegible] a reading in M which is inc (12) M reads [illegible] (13) [illegible] is the reading in M which seems to be incorrect. (14) K. reads [illegible] which is incorrect. This chapter and the next are wanting in M (15) [illegible] a variant in K.

मध्ये तासाञ्च शक्तीनां सर्व्वेशं रसभैरवम् ।
शुद्धस्फटिकसंकाशं पञ्चवक्त्रं त्रियम्बकम्[1] ॥ ६३ ॥
ज्वलत्पिङ्गोग्रनेत्रञ्च[2] ज्वलज्जिह्वाननं तथा ।
ज्वलद्भ्रुवं[3] ज्वलत्क्रोधं दुःप्रेक्ष्यं[4] प्रेतविष्टरम् ॥ ६४ ॥
जटामुकुटसंयुक्तं चन्द्रार्द्धकृतशेखरम्[5] ।
व्याघ्रचर्म्मधरं नागोपवीतं वृषभध्वजम्[6] ॥ ६५ ॥
अष्टादशभुजं देवमीषद्धसिताननम् ।
ध्यानिर्व्यापेन मनुना पूजयेत् सकलं शिवम् ॥ ६६ ॥
रसेश्वरस्य मन्त्रञ्च कथ्यमानं निबोध मे[7] ॥ ६७ ॥

ॐ ह्रीं क्रों[8] रसेश्वराय महाकालाय महाबलायाघोर-
भैरवाय[9] वज्रवीर[10] क्रोधकङ्काल ह्रौं: क्षु:[11] ॥ ६८ ॥
तयोरुत्सङ्गे महादेवीं रत्नाभरणभूषणाम्[12] ।

---

(1) M reads त्र्यम्बकम्, which is the correct form of त्रियम्बकम्. (2) K reads ज्वलत्पिङ्गोग्रनेत्रञ्च. (3) M reads ज्वलद्भ्रुव. (4) M reads दुष्प्रेक्ष्य, which is an alternative form of दुःप्रेक्ष्य. (5) M reads चन्द्रार्द्धकृतशेखरम् (6) M reads नाग उपवीत वृषध्वजम्, wherein the former is grammatically incorrect. (7) In lieu of this hemistich M has only रसेश्वरमनुम् which ought to be रसेश्वरमन्त्रम् (8) M reads ओम् ह्रीम् क्रैम् क्रम्. (9) M reads भैरव. (10) वज्रवीर is the reading in M. The correct form would be वज्रवीराय and क्रोधकङ्कालाय. (11) M reads ह्रौं क्षः । After this, is added इति मन्त्रः This मन्त्र contains 32 letters (द्वात्रिंशद्वर्णैः), the last two (ह्रौं क्षु) being excepted. (12) रत्नाभरणभूषिताम्, a variant in K.

उद्यत्हेमरुचिरां पीतवस्त्रां त्रिलोचनाम् ॥ ६९ ॥
श्वेतचामरयोर्मध्ये मुक्ताच्छत्रेण शोभिताम्[1] ।
अङ्कुशं चाक्षमालां च दधती दक्षहस्तयोः ॥ ७० ॥
पाशाभये च वामाभ्यां[2] चन्द्रार्द्धकृतशेखराम् ।
रसाङ्कुशीं[3] महादेवीं नीलग्रीवां कृपामयीम् ॥ ७१ ॥
पूजयेद्रससिद्ध्यर्थं विद्यया पञ्चबीजया ।
वाग्भवं भुवनेशीश्च[4] श्रीबीजञ्च सुरेश्वरि ॥ ७२ ॥
मादनं[5] शक्तिबीजञ्च—विद्या[6] परमदुर्लभा ।
धूपदीपैश्च नैवेद्यै[7] पुष्पताम्बूलचन्दनैः ॥ ७३ ॥
शान्तिपाठस्य निर्घोषैः[8] स्तोत्रमङ्गलनिस्वनैः[9] ।
घण्टाटङ्कारसंयुक्तैः पूजां कृत्वा यथाविधि ॥ ७४ ॥
अघोरेण बलिं दद्यात् सर्व्वविघ्नोपशान्तये[10] ।

---

(1) K reads मुक्ताच्छत्रेणशोभितां which is a palpable error of the scribe. (2) वरद मदद्दस्त द्वाभ्यां a variant in K. पाशमयौ च वामाभ्यां a variant in M where in the first term is grammatically incorrect. (3) रसाङ्कुशां a reading in M. (4) K reads भुवनश नी. भुवनेशिश a variant in M which ought to be भुवनेशीश्च. (5) K reads मदनं. (6) K reads विद्याय which is incorrect. This charana "विद्या परमदुर्लभा" is the remark made by Siva to draw special attention of his consort. This विद्या is to be communicated by the गुरु to his शिष्य (see śloka 82). (7) धूपदीपै सुमैवद्यै a variant in K. (8) K reads शान्तिपाठेय नि घोषै. M reads शास्त्रपाठस्य निर्घोषैः. We have adopted the above reading after collating all the texts. (9) K reads नि स्वनै. (10) K reads सर्व्वविघ्नस्य शान्तय।

भूतेभ्यो यत्तरक्षभ्यो[1] पिशाचेभ्यश्च यत्नतः ॥ ७५ ॥
अघोरमन्त्रसंयुक्त[2]मोङ्काराद्दिनमोऽन्तकम् ।
सर्व्वकर्म्माकर[3] देवि विघ्नोपद्रवनाशनम्[4] ॥ ७६ ॥
यथाशक्ति जपित्वा तु विद्यामेव रसाङ्कुशीम् ।[5]
कुण्डं विधाय देवेशि योनिचक्र[6] समेखलम् ॥ ७७ ॥
तत्राज्यतिलसंयुक्तं होमं कृत्वा क्रमेण तु ।
कलशं स्थापयेद्देवि पय.पूर्णं फलान्वितम्[7] ॥ ७८ ॥
पञ्चरत्नसमोपेतं वासोभिः परिवेष्टितम् ।
सप्ताष्टादश[8]विद्याभिरभिमन्त्र्य पृथक् पृथक् ॥ ७९ ॥
गन्धपुष्पादिभिः पूर्ण[9] पञ्चदैरुपशोभितम् ।
अर्घ्यपात्रञ्च[10] संपूज्य यद्दन्त्याभ्युक्ष्य साधकम्[11] ॥ ८० ॥
शतमष्टोत्तरं चैवमर्घ्यपात्रोदकेन[12] तु ।

(1) Both K and M read यत्तरक्षेभ्य, which is grammatically incorrect, the term being रक्षस् and not रक्ष (2) M reads संयुक्तं, which is incorrect (3) सर्व्वकर्म्माकर, a variant in M, which is meaningless (4) K reads विघ्नोपद्रवनाशनम्, which is palpably an error of the scribe M adds here after the 76th śloka अघोराद्योऽपि घोर इति मन्त्र नमोऽन्तकम्, which we have rejected as it is redundant. (5) K reads विद्योविद्या विद्या तु, which has no clear sense (6) योनि चक्र, a variant in K. (7) पय पूर्णफलादिकम् a reading in M. (8) K reads सप्तादश. (9) M reads कोर्ण (10) K reads बलिपात्र (11) Both K and M read यद्दन्त्युक्ष्य, which is incorrect M reads साधक, which is grammatically untenable. (12) चैव मर्घ्यपात्रोदकेन, a variant in K.

अभिषिच्य[1] विधानेन कुम्भतोयेन मन्त्रवित् ॥ ८१ ॥
विद्यामुपदिशेद्देवि पाठयेद्रससाधकम्[2] ।
कुमारीयोगिनीयोगि[3]साधकांश्च यथोचितैः[4] ॥ ८२ ॥
तर्पयेदन्नपानैश्च[5] जागरं तत्र कारयेत् ।
एवंविहितदीक्षस्तु[6] साधकः सुरनायिके ॥ ८३ ॥
महाभूतमयीं तत्त्व[7] वर्णपञ्चकसंयुताम्[8] ।
पञ्चबीजात्मिका[9] विद्या प्राणायामात्मसूत्रके[10] ॥ ८४ ॥
मुद्रां रसाङ्कुशीं बध्वा लक्षमेकं जपेत्प्रिये ।
तस्य सिध्यति देवेशि निर्विघ्नं रसभैरवः ॥ ८५ ॥
प्रणवादिनमोऽन्तस्तु तर्पणान्ते जपः परः[11] ।
अहिंसा चन्दनं[12] सत्यं पुष्पमस्तेयधूपनम्[13] ॥ ८६ ॥
ब्रह्मचर्यं महादीपमप्रतिग्रहघण्टिकाम्[14] ।

---

(1) K reads अभिषिच, which is incorrect (2) K reads साधक, which is incorrect M reads साधन, which conveys a different idea. (3) K reads योगि, which is erroneous. (4) M reads साधकाश्च यथो चित wherein the first term is incorrect. (5) दानपानैश्च, a variant in M (6) K reads दीक्षा तु, which is erroneous. (7) M reads तन्तु, which means dependent. (8) वर्णात्म तां महात्मिक°, a variant in M (9) पञ्च बीजात्मिका, a reading in K, which is absurd (10) K reads प्राणाय मात्मसूत्रक. M reads प्राणायामात्मसूत्रके We have adopted the above reading after collating all the texts (11) K reads परम् प्रणवादिनमोन्त स्वाहान्तान्ते जप पर°, a variant in M (12) K reads चन्दन (13) M reads धूपकम (14) M reads कर्णिकाम

पायसान्नं[1] महेशानि सर्व्वभूतदयात्मकम्[2] ॥ ८७ ॥
संगृह्याराधयेद्देवो[3] स भवेत्सिद्धिभाजनम्[4] ।
सहस्रं वा शतं वापि त्रिसन्ध्यं संजपेदिमाम्[5] ॥ ८८ ॥
अस्या आज्ञा[6]प्रसादेन जायते खेचरो रसः ।
दिव्यौषध्यश्च तस्यैव सिध्यन्ति सुरवन्दिते ॥ ८९ ॥
अनङ्कुशं समारुह्य वने मत्तगजं यथा ।
तथाऽरसाङ्कुशाभिज्ञो[7] रसेन्द्रं प्राप्य सीदति[8] ॥ ९० ॥
विद्यया[9] सह मन्तव्यं गुरोः[10] सत्सम्प्रदायिनः ।
रसप्रयोगजातन्तु[11] सर्व्वतः सिद्धिमिच्छता ॥ ९१ ॥
अथ प्रत्यावताराय[12] पूर्व्वोक्तं रसभैरवम् ।
समाहितमना ध्यायेत् तदालीनं[13] समाचरेत् ॥ ९२ ॥

---

(1) K reads पायसानि, which seems to be incorrect. (2) सर्व्वभूतमयात्मकम्, a reading in M (3) M reads देवि, which makes the sentence incomplete (4) लभेत् is the reading in M. सिद्धिभाजन is the reading in K. (5) त्रिसन्ध्या सञ्जपेदिमाम्, a variant in M, wherein the first term is incorrect (6) अस्याज्ञया is the reading in K, which is not correct. (7) रसाङ्कुशापूर्ण, a variant in K. In this reading no nominative to सीदति is to be found. (8) K reads सिद्यति, which is absurd (9) K reads मयया, which is senseless. (10) K reads गुरो (without विसर्ग) which is erroneous (11) M reads रसप्रयोगजातम् which is incorrect [जात is neuter] (12) प्रत्यवतारार्थ is the reading in M, which is an evident error of the scribe (13) M read तदालीनम्

अनाहते[1] ब्रह्मरन्ध्रे मनः कृत्वा निरामये ।
करन्यासं पुरा[2] कृत्वा अङ्गन्यासमनन्तरम्[3] ।
यथाशक्ति जपेन्मन्त्रं रसेन्द्रस्य समाहितः ॥ ८३ ॥
चतुष्कोणं पुनः[4] कृत्वा मध्ये षट्कोणमण्डलम्[5] ।
हस्तमात्रं द्विहस्तं वा तण्डुलैर्विमलैर्लिखेत् ॥ ८४ ॥
सुगन्धैर्लेपिते स्थाने[6] पूजयेच्चन्दनादिभिः ॥ ८५ ॥
कर्णिकायां[7] न्यसेद्देवि[8] पूर्वोक्तं रसभैरवम् ।
षट्कोणे[9] देवताषट्कं महाकालादि विन्यसेत् ॥ ८६ ॥
महाकालं महाबल[10]मघोरं वज्रवीरकम्[11] ।
न्यसेत् क्रोधञ्च कङ्कालं मालामन्त्रैः समर्चयेत् ॥ ८७ ॥

ॐ ह्रीं क्रौं ह्रूँ ह्रः ह्रीं ह्रीं ह्रीं ह्रूं हुं फट्—रसेश्वराय महाकालभैरवाय रौद्ररूपाय कृष्णपिङ्गललोचनाय । अवतर २ अवतारय २ जल्प २ जल्पय २ शुभाशुभं कथय २ कथापय २ मद्रक्षां कुरु २ रससिद्धिं देहि ॥ इति मालामन्त्रः ॥[12]

---

(1) अनाहतौ a variant in M which is incorrect. (2) M reads पुन (3) The portion commencing from this charana and ending in the third charana of the 94th sloka is not found in K (4) B reads पुरा (5) K and M read मण्डले (6) B reads सुगन्धिलेपितस्थाने (7) M reads कर्णिकाया which seems to be an error of the scribe (8) न्यसेद्देवं a reading in K (9) M reads षट्कोण which is not (10) B and K read महाबल this reading we have adopted though it makes a defect in metre because we see the same word occurring afterwards M reads महाबाल (11) वज्रवीरकम् is the variant in M (12) B reads ॐ ह्रीं क्रौं स्वः स्वः ह्रीं ह्रीं ह्रीं हूं फट् ।

ॐ महाकालभैरवाय हृदयाय नमः। ॐ महाबलभैरवाय शिरसे स्वाहा। ॐ अघोरभैरवाय शिखायै वौषट्। ॐ वज्रभैरवाय कवचाय हुम्। ॐ क्रोधभैरवाय नेत्राय वौषट्। कङ्कालभैरवाय अस्त्राय फट्। सर्व्वत्र स्वाहान्तम्। एवङ्गन्यासाः।[1] एवमङ्गुलीन्यासान् कुर्य्यादादौ। एते षडङ्गे नने च मूलमन्त्राः॥

एवं न्यासाचरैः कूटे[2] गन्धपुष्पैः समर्च्चयेत्[3]।
पूर्णकुम्भ[4] न्यसेन्मध्ये शरावं तण्डुलैः सह॥ ८८॥
तस्योपरि घृतदीप[5] वर्त्तीं मन्त्रैय[6] मन्त्रवेत्॥ ८९॥
समानीय कुमारीं तु कुमार वा शुभेक्षणम्।[7]

एकद्वित्रिचतुःप्रस्थं[1] यथालाभं समानयेत् ।
गन्धपुष्पैर्धूपदीपैः नैवेद्येन च पूजयेत् ॥ १०० ॥
एकैकस्या[2] न्यसेन्मन्त्रं हृदयाद्याश्च[3] देवताः ॥ १०१ ॥
ततो निरीक्ष्य[4] तद्दीपं[5] सर्व्वास्तत्र[6] कुमारिकाः[7] ।
पश्यन्ति देवता दीपे कुमाराय[8] शुभाशुभम् ।
सिद्धिं वा[9]प्यथवासिद्धिं कथयन्ति कुमारिकाः[10] ॥ १०२ ॥
प्रश्नावतारं ज्ञात्वेति[11] रसकर्म्मणि सञ्चरेत्[12] ॥ १०३ ॥
यः पुरा देवदेवेशि रसेन्द्रे[13] भावितात्मवान् ।
सप्तजन्म[14] मृतो जातो न त्यजेद्रसभावनम्[15] ॥ १०४ ॥
एवं शुभाशुभं ज्ञात्वा देवतानुग्रहान्वितः ।

---

(1) एकद्वित्रिचतुःप्रस्थ is the reading in K, which is not correct. (2) B reads एकैक स्यात्. M reads एकैकस्य (3) हृदयादीश is the reading in M. They are mentioned in p. 27. (4) M reads निरीक्ष्य. B and K read निरीक्ष, which seems to be inc (5) B reads तद्दीप K reads त द्दीप, which is grammatically untenable (6) B reads सर्व्वं ते च K reads सर्व्वा तत्र, which is a palpable mistake (7) B and M read कुमारिका. (8) ते कुमारा is the reading in B and M. (9) B and M read वा. (10) B and M read कुमारिका. (11) प्रश्नावतारम् ज्ञात्वा is the reading in M, which seems to be incorrect. (12) B reads कर्म्मकर्माणि. M reads रसकर्म्मणि सञ्चरन्, which is incorrect (13) या पुरा देवदेवेशि रसेन्द्र is the reading in M, which is incorrect. (14) B and M read सप्त. (15) B reads रसभावनं रसभाविनम् is the variant in M, which has no sense here

मण्डपे पूर्व्ववद्देवी[1]मर्च्चयित्वा रसाङ्कुशीम्[2] ॥ १०५ ॥
आचार्य्यमपि संपूज्य धूपस्रक्चन्दनादिभिः ।
अघोरेण बलिं दत्त्वा ततः कर्म्म समाचरेत् ॥ १०६ ॥
ओषध्यो मण्डपे[3] प्राच्या रसस्वेदोऽग्निगोचरे[4] ।
दक्षिणस्या लोहमारो नैर्ऋत्यां पेषणादिकम्[5] ॥ १०७ ॥
द्रुतिक्रिया तु[6] वारुण्यां वायव्ये धमनं प्रिये ।
वर्णोत्कर्षस्तु[7] कौवेर्य्याम् ऐशान्यां रसवेधनम्[8] ॥ १०८ ॥
आसनन्तु गुरोर्मध्ये[9] निवेश्य[10] सुरनायिके ।
नियामनादिकं कर्म्म क्रामणान्तं[11] वरानने ।
रसाङ्कुशेन मन्त्रेण कर्त्तव्यं साधकेन तु ॥ १०९ ॥

---

(1) B and K read देवि, which is incorrect. (2) B reads रसाङ्कुशा. M reads रसाङ्कुशम्. Both are grammatically erroneous. (3) ओषधी मन्त्रवित्, a variant in K, wherein मन्त्रवित् has no final verb to govern (4) B reads रस स्वेदोऽग्निगोचरे K reads रसे स्वेदोऽग्निगोचरे. (5) K reads पेषिण दक, wherein पेषिण is incorrect. The correct form is पेषण [दक=water.] (6) B reads द्रुतिक्रिया तु, which ought to be spelt द्रुतिक्रिया तु K reads कर्मौ चूर्णोक्ति M reads द्रुतिक्रिया तु. (7) वर्णोत्कर्षश, a reading in K (8) ईशान्यां रसबन्धनम्, a variant in B and M. Cf रसरत्नसमुच्चय, Chap VII, Ślokas 3—5. (9) आसनन्तु गुरुसंख्ये, a reading in K, which is incorrect (10) K reads निवेद्य, which is not accurate here (11) कर्मयाम्, a reading in M, which seems to be incorrect. But K has a different reading in the 5th. Patala, Śloka 1, नियामिकादिक कर्म्म क्रमशाम्

यः पुरा देवदेवेशि वर्णितो[1] रसभैरवः ।
सद्योजातं तस्य जानु[2] वामदेवन्तु गुह्यकम्[3] ॥ ११० ॥
अघोरं हृदयं[4] तस्य वक्त्रं तत्पुरुषं स्मृतम्[5] ।
यावद्[6]भ्रूमध्यमीशानमर्द्धचन्द्रं ललाटकम्[7] ॥ १११ ॥
बिन्दुर्देवेशि तस्योर्द्ध्वं बिन्दोरूर्द्ध्वं स्थितो नदः[8] ।
ललाटशिरसोर्मध्ये[9] शक्तिस्तत्रैव संस्थिता ॥ ११२ ॥
व्यापिनी[10] ब्रह्मरन्ध्रस्था[11] तस्योर्द्ध्वं सुमना[12] भवेत् ।
उन्मना उन्मनोभावम्[13] उन्मनापदमव्ययम् ॥ ११३ ॥

---

(1) M reads वर्णत, which is incorrect (2) K reads जानी सद्योज तस्या जानु, a variant in M wherein जानु is an error of the scribe (3) K reads गुह्यके वामदेवेन्तु गुह्यकम्, a reading in M, wherein the first term is erroneous. (4) K and M read अघोरहृदय, which is not correct (5) B reads तत्पुरुष स्मृत K reads तत्पुरुष स्मृतम् (6) B and M read यावेद्, which is not appropriate (7) K reads ललाटके M reads भ्रूचन्द्रललाटकम् The final verb भावयेत्, stated in the śloka 116 is to be understood here (in the ślokas 110-111) by सन्दंश इति connection (8) The 112th śloka is not found in B, except the initial and final words, i. e. बिन्दुर्दे and संस्थिता बिन्दोरूर्द्ध्वस्थितो नदः, a variant in M, which is incorrect [Here the correct word is नादः as is stated in the [illegible] Paṭala I "[illegible]" (9) ललाट शिरसो मध्ये, a reading in M (10) K reads व्यापिनि M reads व्यापिनी Both are incorrect (11) M reads ब्रह्मरन्ध्रगा (12) B and K read सुमन (13) B and M read उन्मन उन्मनोभावम् [उन्मन = उन्मनापद]

तस्योर्द्ध्वं परमं सत्यं[1] व्योमस्थायि परात्परम्[2] ।
शून्यं शून्यं पुन[3] शून्यं त्रिशून्यञ्च[4] निरामयम् ॥ ११४ ॥
नभश्च गगनं व्योम खमाकाशं[5] च केवलम् ।
निष्कल निर्म्मलं नित्यं निस्तरङ्गं निरामयम् ॥ ११५ ॥
निष्प्रपञ्चं[6] निराधारं निर्गुणं गुणगोचरम्[7] ।
एवंरूपं सदा ध्यायेत् स्वदेहे रसभैरवम् ॥ ११६ ॥
यदा च निश्चलं[8] ध्यायेत् यदा च निश्चलं[9] मन: ।
वह्निमध्ये तदा[10] सूतो बध्यते निश्चलस्तथा[11] ॥ ११७ ॥
यदा च[12] चलति ध्यानं रसो वह्नौ न तिष्ठति ॥ ११८ ॥
मण्डलस्य बहि:[13] रात्रौ सुरामञ्चामिषादिभि: ।
भचयेद्[14]यचगन्धर्व्वान् पिशाचान् राचसांस्तथा ॥ ११९ ॥

---

(1) B reads तस्योर्द्धे K reads तु पद शून्य M reads तु पर सत्य (2) B has व्योमव्यापि परापर. व्योमव्यापीच तत्परम्, a variant in M, which is erroneous. (3) K reads पर (4) B reads विशून्यञ्च (5) खप्रकाश, a variant in K [This repetition expresses the intensity of essence of God, who is compared with nothing but the sky] (6) K reads नि प्रपञ्च (7) नागमनुपमगोचरम्, a variant in M, which has no clear meaning. (8) K reads सनिश्चल, which is inc. (9) B reads न चल K reads तदा च M reads यदा वै (10) B reads तथा. (11) M reads तदा, thus creating a tautology (12) B and K read यथा च M reads यदा स. (13) K reads मण्डल स M reads मण्डप कारयेत्. (14) The portion beginning from भचयेद and ending in वटुकेश्वरम् is wanting in M.

अवश्या रोगजातस्य[1] सन्देहस्य[2] पदे पदे ।
आलस्याद्गुरुलोभाच्च[3] परस्य कथनेन च[4] ।
उत्पन्नमपि विज्ञानं हरन्ति कुलकाः प्रिये ॥ १२२ ॥
दीक्षितो रसकर्माणि मन्त्रन्यासविदाचरेत् ।[5]
तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ १२३ ॥[6]

इति श्रीपार्वतीपरमेश्वरसंवादे[7]
रसार्णवे रससंहितायां[8]
दीक्षाविधानो नाम[9]
द्वितीयः पटलः ॥२॥

---

(1) B and K read रोगजातस्य, which seems to be incorrect. (2) K reads सदेहस्य. (3) K reads लोभस्य. (4) B has परस्य कथनेन वा (5) मन्त्रे न्यास विचारयन्, a variant in K. दीक्षिते रसकर्माणि मन्त्रन्यासे समाचरेत्, a variant in M (6) This hemistich is not found in M (7) (8) (9) These portions are not found in M. K reads दीक्षाविधान नाम.

तृतीयः पटलः ।



श्रीदेव्युवाच ।[1]

भगवन् देवदेवेश लोकनाथ जगत्पते ।
मन्त्रन्यासं समाचक्ष्व रसकर्म्मोपकारकम् ॥ १ ॥

श्रीभैरव उवाच ।[2]

पुनरन्य[3] प्रवक्ष्यामि मन्त्रमूर्त्तिं रसाङ्कुशीम्[4] ।
पञ्चमं तु गृहं देवि दुर्लभं देवदानवैः ॥ २ ॥
चत्वारः प्रधानगृहाः हंसगृहं[5] तु पञ्चमम् ।
यत्र सिद्धिर्मकारादिः[6] तिष्ठते[7] पञ्चमे गृहे[8] ॥ ३ ॥
लिङ्गाश्रयं यथा रूपं[9] लिङ्गमायया[10] तु लिङ्गिनी ।
गगनेन[11] तु सा ज्ञेया भगरेखा[12] तु पञ्चमी ॥ ४ ॥

काल्कीकृतं रस[2] व्योम-कान्त[3]मध्वाज्यसंयुतम् ।
भुक्त्वा गच्छेदमरता वेधीकरणमुत्तमम् ॥ १५ ॥
चूर्णमभ्रकसत्त्वस्य कान्तलोहस्य वा ततः ।
तीक्ष्णस्य वा महादेवि त्रिफलाक्काथभावितम् ॥ १६ ॥
यावदञ्जनसंकाश वस्त्रच्छन्नं विशोध्य तत्[4] ।
भृङ्गामलक[5]सारेण हरिद्राया रसेन च ॥ १७ ॥
पुटितं रससंयुक्तं[6] मधुघृतसमन्वितम्[7] ।
लोहसंपुटमध्यस्थं मास धान्ये प्रतिष्ठितम् ॥ १८ ॥
घृतेन मधुना लिह्यात् वेधीकरणमुत्तमम् ।
एवं वर्षप्रयोगेण[8] सहस्रायुर्भवेन्नरः ॥ १९ ॥
रससिद्धे[9] पुरा हेम गुञ्जामात्रं दिने दिने ।
भक्षयेद्देहसिद्ध्यर्थं रससिद्धिः प्रजायते ॥ २० ॥
कान्ताभ्रसत्त्व सरस मोपलानवजारितम्[10] ।
लिह्यादादौ समध्वाज्य[11] वेधीकरणमुत्तमम् ॥ २१ ॥

(1) D has वकएयारि सचौद्र which is incorrect K has an incomplete charana—कण्यासाचौद्र (2) D reads कल्कित सह्म (3) B reads कांत (4) D reads वस्त्रच्छित्र विशोधत, which is improper. K reads वस्त्रच्छन्नं विशोधत which is partly incorrect (5) त्रिभागामलक is the reading in D (6) B has रसेन युत (7) मधुसमन्वित मत, a variant in B (8) B reads एव वर्षप्रयोगेन (9) K reads रससिद्धे, which is grammatically incorrect (10) D and K have कांताभ्रकमृत मल रसमोपल मयोजितम् Here वर्म is mentioned (11) लिह्यादम समध्वाज्य a variant in D and K Here रस is repeated

सर्पं सर्पार्द्धमथवा पूर्व्वमेवं[1] तु भक्षयेत् ॥ २२ ॥
वज्रजीर्णो रसो[2] देवि ह्युत्तमः[3] परिकीर्त्तितः ।
मध्यमो हेमजीर्णस्तु तारजीर्णोऽधमः[4] प्रिये ॥ २३ ॥
हेमजीर्णे भस्मसूते[5] रुद्रत्वं भक्षिते[6] व्रजेत् ।
विष्णुत्वं तारजीर्णे तु[7] ब्रह्मत्वं भास्करेण तु ॥ २४ ॥
तीक्ष्णजीर्णे धनाध्यक्षः सूर्य्यत्वं चपलालये तु[8] ।
वाजरे तु[9] प्रगाढत्वम् अनलत्वं तु रोहणे[10] ।
सामान्येन तु लोहेन यक्षत्वं प्राप्नुयान्नरः ॥ २५ ॥
एवं यो लोहजीर्णं तु भक्षयेद्भस्मसूतकम्[11] ।
जलेन जलरूपः स्यात्[12] स्थलेन स्थलतां व्रजेत् ॥ २६ ॥
तेजोऽधिको तथा तेजः वायोरप्यधिको वशी ।
कर्त्ता हर्त्ता स्वयं साक्षात् मायानुग्रहकारकः ॥ २७ ॥

---

(1) B and D read पूर्वमेव. (2) D reads वज्रधारसो which seems to be incorrect (3) K reads उत्तम (4) B reads erroneously तारजीर्णक्षम D reads ताराजीर्णोक्षम. which is also incorrect. (5) हेमजीर्णे भस्मसूते a variant in D हेमजीर्णे भस्मन्त a variant in K. (6) D reads भक्षित K reads भक्षितो Both are incorrect (7) B reads तारजीर्णस्तु D reads विष्णुत्वं तारजीर्णे तु, wherein the first term is incorrect (8) B has सूर्यत्वं तु पटालये D has सूर्यत्वं च प्रलये K has सूर्यत्वं चपलये (9) D reads वोजरे तु which is incorrect (10) This charana is not found in D K has अनलत्वं तु मारोहणे, which seems to be incorrect (11) B reads सूतकैः which seems to be incorrect (12) B has जलरूप च D has जलरूपश्च (जलरूप स)

यत्र[1] मूत्रपुरीषं तु साधकस्तु परित्यजेत्[2] ।
पाषाणो मृन्मय तत्र स्पृष्टं भवति काञ्चनम्[3] ॥ २८ ॥
प्रस्वेदस्तस्य[4] गात्रस्य लोहान्यष्टौ च वेधयेत् ।
तत् सर्व्वं कनकं नित्य[5] भक्षिते द्वादशे[6] पले ।
रुद्रतुल्यो महादेवि अजरामरकारिणि[7] ॥ २९ ॥
भस्मसूतं तथा तारं[8] भक्षयेत् षोडशं पलम्[9] ।
अथवा तारजीर्णं तु भक्षयेद्भस्मसूतकम् ।
शुल्वञ्च वङ्गघोषं च[10] तत्स्वेदात् तारतां व्रजेत् ॥ ३० ॥
अथवा[11] तीक्ष्णजीर्णं तु भक्षयेद्भस्मसूतकम् ।
मूत्रेण तस्य स्पृष्टं तु वङ्गं व्रजति[12] तारताम् ॥ ३१ ॥
एकैकेन निषेकेण[13] स्तम्भन नागवङ्गयो.[14] ॥ ३२ ॥
गुञ्जामात्र[15] रसं देवि हेमजीर्णं तु भक्षयेत् ।

---

(1) D and K read यस्य which seems to be incorrect. (2) D has साधकस्य प्रयोजयेत् (3) This hemistich is not found in K (4) D reads प्रवेपादाङ्ग (5) D reads मोक्ता (6) भक्षिपेद्द्वादशे a variant in D (7) K reads अजरामरकारण (8) This hemistich is not found in D. (9) B reads षोडशे पले which is grammatically incorrect This hemistich is not found in D (10) This hemistich and the next one are not found in B D reads शुल्वोत्थं वङ्गघोषे K reads शुल्वोत्थ (11) D reads अन्यथा (12) B and D read भवति, which is incorrect [भजति is the correct reading] (13) D reads निषेकैन K reads निषेकेन Both are incorrect (14) B reads एकवङ्गयो D reads स्तम्न (15) B reads गुञ्जातात्र [मात्र]

द्विगुणं तारजीर्णस्य रविजीर्णस्य तत्त्रयम्[1] ॥ ३३ ॥
तीक्ष्णाभ्रकान्तसायैकं[2] गुञ्जैका द्राविका भवेत्[3] ।
वज्रवैक्रान्तजीर्णं तु भक्षयेत् सर्पिषान्वितम्[4] ॥ ३४ ॥
नागं वङ्गं रसं भस्म[5] विषोपविषसंयुतम् ।
मात्रायुक्तं ततश्चैव[6] भक्षयेच्च रसायने[7] ॥ ३५ ॥
हेम तारं तथा कान्तं जायतेऽग्निसमं क्रमात् ।
वदय रसराजोऽयं देहसिद्धिं प्रदापयेत् ॥ ३६ ॥
यथायस्कान्तमाक्षीक वैक्रान्ताभ्रककाञ्चनैः ।
एतैर्जीर्णैर्यथालाभं रस. शस्तो रसायने[8] ॥ ३७ ॥
षड्भिर्वोपरसायैव[9] भक्षणार्थं च वाहयेत्[10] ।
भक्षणात्तीक्ष्णजीर्णस्य[11] पलमेकं तु भक्षयेत्[12] ॥ ३८ ॥
दशवर्षसहस्राणि वज्रकाय. स जीवति[13] ॥ ३९ ॥
एवञ्च द्वादशपलं तीक्ष्णजीर्णं तु भक्षयेत् ।

---

(1) B has [illegible], which destroys the metre (2) D has an incomplete charana—तीक्ष्णाभ्रकान्त K has तीक्ष्णाभ्रकान्तसवि (3) B reads द्रवको D wants this charana K reads द्रावको, which is not gram correct (4) [illegible] a variant in D K reads सर्पि [illegible] (5) D has [illegible] K has [illegible] (6) [illegible] is the reading in D, [illegible] is the reading in K (7) D has [illegible] K wants this charana and the next eleven ones (8) The slokas 36th and 37th are not found in D (9) [illegible], a variant in D, (10) B reads [illegible] D reads [illegible] (11) [illegible] a variant in D (12) [illegible] a variant in D (13) This [illegible] and the next [illegible] are not found in D

एव जीवेन्महाकल्प[1] प्रलयान्ते शिव व्रजेत् ॥ ४० ॥
भस्मन गुल्मजीर्णस्य पलैकै लभमायुष. ।
द्विपले कोटिरायुष्य त्रिपले ब्रह्मणायुषम्[2] ॥ ४१ ॥
चतु पले वैष्णवायु रुद्रायु पञ्चमे पले ।
षष्ठे पले च समासे महाकल्प स जीवति[3] ॥ ४२ ॥
भस्मनो हेमजीर्णस्य पलेन ब्राह्ममायुषम्[4] ।
द्विपले वैष्णवायुष्य रुद्रायुस्त्रिपलेन तु[5] ।
चतु पलेन देवेशि शिवत्व प्राप्नुयान्नर[6] ॥ ४३ ॥
हेमजीर्णे भस्मसूते[7] त्रिपले भक्षिते क्रमात्[8] ।
चष्टाशीति[9]सहस्राणि योगिन्यो बलदर्पिता.[10] ।
तस्य तिष्ठन्ति[11] किं कार्य्य कामरूपी भवेन्नर ॥ ४४ ॥
यद्यद्भावयते रूप तत्तद्रूपधरो[12] भवेत् ।
मिते पलैकादशभि[13] हेमभस्मानि[14] भक्षयेत् ॥ ४५ ॥

---

(1) एव जीव महाकाल a variant in D (2) B reads ब्रह्मणायुत (3) This śloka is not found in D (4) Th s hemistich is not found in D K reads पल ब्रह्मपलायुत which has no sense (5) K reads erroneously त्रोपलन (6) शिवत्व समवाप्नुयात् a variant in D शिवतत्वमवाप्नुयात् a variant in K (7) D reads हेमजीर्णे भस्मभूते which is partly incorrect (8) B reads erroneously त्रिफल त्रिपलेन इति क्रमात् a variant in D (9) चष्टाशीति is the incorrect reading in K (10) D reads बलिदायिने, which is senseless (11) K reads तिष्ठ तिष्ठति wh ch is incorrect (12) D reads तत्तद्भावधरो (13) शीर्षे पलैकान्दशभि a variant in B मिते पलैर्वा दशभि a variant in D (14) D reads हेमभस्मभि K reads हेमभस्मादि

शुष्कैकासाद्यं देवेशि घात्वा चाग्निवर्सं निजम्[1] ।
घृतेन मधुनाच्छाद्य[2] ताम्बूलं कामिनीर्भजेत्[3] ॥ ४६ ॥
एको हि दोषः सूक्ष्मोऽयं भक्षिते भस्मसूतके[4] ।
त्रिसप्ताहं वरारोहे कामान्धो जायते नरः[5] ॥ ४७ ॥
कामिनीनां सहस्रं तु चोभयेद्दिवसान्तरे[6] ।
नारीसङ्गाद्[7]वरारोहे देहे क्राम्यति[8] सूतकः ॥ ४८ ॥
नारीसङ्गे[9] वरारोहे ह्यजीर्णं तस्य जायते ॥ ४९ ॥
मैथुनाद्यनिते शुक्रे[10] विषमाह्वावधि[11] क्रमात् ।
जायते प्राणसन्देह[12]स्तस्मात्तन्मैथुनं त्यजेत्[13] ॥ ५० ॥
युवत्या जल्पनं कार्यं युवत्या चाङ्गमर्द्दनम्[14] ।
यस्या.[15] स्पर्शनमात्रेण रस क्राम्यति[16] विग्रहे ॥ ५१ ॥
यथा कामोऽभ्युदयति[17] सूक्ष्मोऽप्यभिवीक्षणात् ।

---

(1) D has [illegible] which is incorrect (2) D reads [illegible] which is incorrect. (3) D reads [illegible] which is not correct. (4) [illegible] a variant in D (5) D reads [illegible], which is not accurate (6) K reads [illegible] (7) D reads [illegible] which is incorrect. (8) K reads [illegible] (9) D reads [illegible], which is incorrect (10) D reads [illegible] (11) [illegible], an incorrect variant in D K has [illegible] (12) D reads erroneously [illegible] (13) [illegible], a variant in D [illegible] wherein the first term is incorrect. (14) D reads [illegible] K reads [illegible] Both are incorrect. (15) K reads [illegible] (16) K reads [illegible] (17) K has [illegible]

तथा[1] क्राम्यति देवेशि सूतकोऽसौ ततः[2] क्रमात् ॥ ५२ ॥
अश्वत्थपत्रसदृशो[3] भगो यस्याः समः शुभः[4] ।
तादृश्याः सुरतं[5] देवि भाजनं तु रसायने ॥ ५३ ॥
निर्मांसयैव दीर्घया भगः शुष्कशिरास्तथा ।
सदा दारिद्र्यकर्त्तारं वर्ज्जयेत्तं रसायने[6] ॥ ५४ ॥
अर्घ्येण तर्पयेन्नित्यं[7] मत्स्यमांसं निवेदयेत्[8] ।
योगीन्द्रान् योगिनीसंन्वैः[9] पूजयित्वा क्षमापयेत् ।
ककाराष्टकवर्गैस्तु[10] कट्वम्ललवणं त्यजेत् ॥ ५५ ॥
अभ्रजीर्णपलैकेन[11] व्याधिभिर्नाभिभूयते[12] ।
द्वितीये शुक्रवृद्धिः[13] स्यात् तृतीये बलवान् भवेत् ॥ ५६ ॥
चतुर्थे पलितं हन्ति[14] वलीं जयति पञ्चमे[15] ।
षष्ठे श्रुतिधरो वाग्मी सप्तमे नेत्ररोगजित्[16] ॥ ५७ ॥

---

(1) D reads तत्र (2) D reads सूतके सेवत, which is incorrect. (3) मद्गुपद्मा यस्य, an absurd variant in D (4) यस्य भोगसम शुभ, an incorrect variant in D (5) D has तादृशोतारश्चो K has तादृश्यास्तु रश्चो Both are unintelligible. (6) This śloka is not found in D (7) चादित्यास्तपुनि नित्य, a variant in D (8) मध्यमार्ग न वेदयेत्, a variant in D (9) यामीद्राश्योगिनी मम्त, a variant in D. योगींद्रा योगिनो मंत्र, a variant in K. Both the readings appear to be incorrect. (10) D has ककाराष्टकवर्गे तु K has ककाराष्टकवर्गे तु (11) पलमात्रप्रयोगेण, a variant in D (12) व्याधिना नाभिभूयते, a partly correct variant in D (13) K reads शुक्रवृद्धि (14) न भाति पलितवान्, an incomplete variant in K (15) वलित जितपञ्चमे, a variant in D. वलिग्जितपञ्चमे, a variant in K Both are incorrect (16) नेत्ररोगकृत्, a reading in D.

अष्टमे तार्क्ष्यदृष्टिः[1] स्यात् ब्रह्मायुर्ब्रह्मविक्रमः ।
नवपलोपयोगेन[2] सुरमेलापको भवेत् ॥ ५८ ॥
दशपलप्रयोगेण[3] द्वितीयः शङ्करो भवेत् ॥ ५९ ॥
रसवीर्य्यस्य रक्षार्थं बलिं दद्याद्दिने दिने ।
जपेन्मृत्युञ्जयं मन्त्रं रससिद्धिः प्रजायते ॥ ६० ॥
समे तु विमले जीर्णे यो रसं भक्षयेन्नरः[4] ।
दशवर्षसहस्राणि स जीवेत् परमेश्वरि[5] ॥ ६१ ॥
द्विगुणे विमले जीर्णे दशलक्षं स जीवति ।
त्रिगुणे विमले जीर्णे दशकोटिं च जीवति[6] ॥ ६२ ॥
जीर्णे चतुर्गुणे देवि[7] रसः खेचरतां नयेत्[8] ।
ततः पञ्चगुणे जीर्णे स्पर्शवेधी[9] महारसः ॥ ६३ ॥
यादृशं विमले जीर्णे[10] तादृशं हेममाक्षिके[11] ।
तत् फलं लभते देवि तस्य वीर्य्ये स जीवति[12] ॥ ६४ ॥

---

(1) मात्स्यदृष्टिः, a reading in D (2) नवमे पुलोपयोगेन a variant in D नवमे लोपयोगेन a variant in K (3) D reads दशमे पल योग, which is incomplete K reads दशात्मप्रयोगेण which is incorrect. (4) रससंभक्षयेन्नर, a variant in D विमलं भक्षयेन्नरः, a variant in K (5) K reads परमेश्वर (6) This hemistich is not found in D (7) जीर्णे चतुर्गुणे देवि, a variant in D (8) This charaṇa and the next one are not found in D (9) D reads सर्ववेधी (10) B reads जीर्णे, which is incorrect D reads यादृशो K reads यादृशे (11) D and K read हेममाक्षिके (12) This hemistich is not found in D and K

पुनरन्यं प्रवक्ष्यामि वज्रभस्मरसायनम् ॥ ६५ ॥
प्रथमं जारयेत्[1] सूते गन्धकं सुरवन्दिते[2] ।
दापयेत्त्रिगुणं तीक्ष्णं समं हेम च सूतके[3] ॥ ६६ ॥
तेनैव हेमजीर्णेन वज्ररत्नं तु[4] लेपयेत् ।
बालवत्सपुरीषेण तद्वज्रं वेष्टयेत्ततः[5] ॥ ६७ ॥
बद्ध्वा पोटलिकां तेन पुटपाकं तु दापयेत् ।
तत्क्षणाज्जायते भस्म शङ्खकुन्देन्दुसन्निभम् ॥ ६८ ॥
तद्वज्रभस्म[6] सुभगे कारयेत् पिष्टिकासमम्[7] ।
तत्सूतगोलकरजो[8] गतदेह[9] विमर्दयेत् ॥ ६९ ॥
पुनस्तद्गोलकरजो बालवत्सपुरीषकैः ।
मूषालेपं तु तेनैव मर्द्दार्देन[10] तु कारयेत् ॥ ७० ॥
तद्वमेदन्धमूषायां[11] मूर्च्छितं वज्रजारितम्[12] ।
फूत्काराणां सहस्रेण[13] भस्म तज्जायते क्षणात् ॥ ७१ ॥

---

(1) D reads जायते K reads मारयेत् (2) समगन्ध च दीयते, a variant in D K has an incomplete charana—गन्धते (3) D reads सहसे स च सूतकम्, which is incorrect. K reads समश्लेषो च सूतक which is also incorrect. (4) D reads वज्रकं ता तु which is senseless. (5) This hemistich and the next one are not found in D (6) D and K read तद्भस्मवज्र, which is grammatically incorrect (7) D has वर्धयेत् पिष्टिक समम् K has वर्धयेत् पोट्टिकासम (8) तत्सूतगोलक भाग, a variant in B. (9) K reads गतदेहं (10) D reads मर्द्दाहेन, which is incorrect B reads मधोर्ध्वेन (11) B reads धमेत्तदन्धमूषायां D has an incomplete charana—धमयेदेध (12) B reads वज्रजारित D reads वज्राज्जारित Both are incorrect (13) B and D read सहस्रे वै

अर्द्धार्द्धं[1] प्राप्यते भस्म गोचीरसदृश प्रिये ॥ ७२ ॥
स्नेहे घृत[2] च यत्नात्तत् कङ्गुणीतैलसयुतम् ।
त्रिसप्ताहादरारोहे कायशुद्धिस्तु[3] जायते ॥ ७३ ॥
तिलमात्र वज्रभस्म हेमभस्म च तत्समम्[4] ।
धमेद्धत्तूर[5]सलिल वलीपलितनाशनम् ॥ ७४ ॥
शुद्धहेम पलान्यष्टौ मृत[6]सूतसमायुतम् ।
मर्दयेन्मध्यमाम्लेन गोलको भवति क्षणात् ॥ ७५ ॥
अर्द्ध च प्राप्यते भस्म गोचीरसदृश प्रिये[7] ॥ ७६ ॥
मृतवज्रस्य भागैक गोलभागचतुष्टयम्[8] ।
मर्दयेत् तत्खल्लेन भस्मीभवति सूतक ॥ ७७ ॥
सारयेद्भूधरे यन्त्रे सप्तसप्तदिनावधि ।
तद्भस्म तु[9] पुन पश्चात् मध्यमाम्लेन मर्दयेत् ॥ ७८ ॥
पुट दद्यात् प्रयत्नेन पञ्चाधिकशतत्रयम् ।
तद्भस्म जायते देवि[10] सिन्दूरारुणसन्निभम् ॥ ७९ ॥
तद्भस्म पलमात्र तु सिद्धाभ्रधान्यसयुतम् ।
सिद्धादेव समयार क्षीराहारी जितेन्द्रिय ॥ ८० ॥

---

(1) D reads अर्द्धाद्धि B reads अर्धोर्ध्वं (2) D reads घृत (3) D reads कार्यसिद्धिश्च (4) तत्समांश समभस्मत्वे an incorrect variant in D (5) B reads धमे धत्तूर (6) D has मृत. K has द्रुत (7) This hemistich is not found in D ; अथ जाय प्रदमतो भस्म गोचीरसदृश, a variant in K (8) गोलाभागचतुष्टये a variant in B गोलभागा is the reading in D (9) D reads तद्भस्मखल्ला तु which is grammatically incorrect (10) तद्भस्म जायते प्रिय, a variant in D and K

द्वितीये सप्तमे चैव[1] भक्षयेच्च पलद्वयम्[2] ।
अनया क्रमवृद्धा तु[3] भक्षयेत् सप्तसप्तकम्[4] ॥ ८१ ॥
तद्वृद्धा[5] जायते सिद्धो[6] दिव्यतेजा भवेन्नरः ।
रुद्रायुष भवेत्तस्य[7] खेचरत्व[8] न संशय ॥ ८२ ॥
तस्य मूत्रपुरीषाभ्या लोहान्यष्टौ च काञ्चनम्[9] ॥ ८३ ॥
तद्भस्मपलमेक तु भ्रामणेन समन्वितम् ।
द्रव्याद्द्वादशसाहस्र पलमाने भुजङ्गमे ।
जायते कनक दिव्य देवाभरणभूषणम् ॥ ८४ ॥
कान्तचूर्णपलान्यष्टौ पलान्यष्टौ रसस्य च ।
एकीकृत्याथ समर्द्य बीजपूराम्लमर्दितम् ।
मर्दयेत्तप्तखल्वेन गोलको भवति क्षणात् ॥ ८५ ॥
मृतवज्रस्य भागैक गोलभागचतुष्टयम् ।
एकीकृत्याथ समर्द्य भस्मीभवति सूतकः ॥ ८६ ॥
मारयेद्भूधरे यन्त्रे सप्तसकलिकाक्रमात् ।
तद्भस्मभागमेकन्तु भागैक गन्धकस्य च ।
अन्धमूषागत ध्मात खोटो भवति तत्क्षणात् ॥ ८७ ॥
द्वात्रिंशन्मृतखोटस्य शुद्धहेमस्य विंशति ।

(1) B reads सप्तके चैव K reads प्रथमेनैव (2) B has भक्षयेत्तत्र यवद्वयम् (3) B reads erroneously चनेन क्रमवृद्धा तु D has an absurd variant प्रवया क्रमवध्वा च (4) K reads सप्तसायक which is incorrect (5) D and K read वर्द्धते (6) K reads सिद्धि (7) B reads भवत्येव . (8) K reads चमत्व (9) The following nineteen hemistichs are not found in D and K

तारं ताम्रं व्योमसत्त्वं कान्तसत्त्वं चतुर्थकम् ।
एकैकं द्वादशांशाः स्युः सर्व्वमेकत्र कारयेत् ॥ ८८ ॥
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ।
द्राविणम्लिलतः खोटान् सूक्ष्मचूर्णं तु कारयेत् ॥ ८९ ॥
तत् खोटसूक्ष्मचूर्णं तु चारोटरससंयुतम् ।
मर्द्देन्मध्यमाग्नेन गोलको भवति क्षणात् ॥ ९० ॥
गोलकस्य पले द्वे च मृतकान्तस्य तत्समम् ।
एकीकृत्याथ समर्द्य मेघनादरसेन च ।
मुनिपुष्परसेनैव दिनमेकं च मर्द्दयेत् ॥ ९१ ॥
गुटिका[1] कारयेद्देवि पञ्चाधिकशतत्रयम्[2] ॥ ९२ ॥
तत्रैका गुटिका सर्पिस्त्रिफलामधुसंयुताम् ।
भक्षयेद्वर्षमेकं तु ब्रह्मायुर्जायते नरः ॥ ९३ ॥
सर्व्वास्ता भक्षयेत् पयात् रुद्रायु स भवेन्नरः[3] ॥ ९४ ॥
मुखैका धारिता वक्त्रे[4] गुटिकामरसुन्दरि ।
हठाद्रोगाणि सर्व्वाणि[5] पलितानि च नाशयेत् ॥ ९५ ॥
उपचारं प्रवक्ष्यामि वज्रसत्त्वरसायने[6] ॥ ९६ ॥
वज्रवज्रस्तु यो[7] देवि रसोऽयं वज्रतां नयेत् ।

---

(1) B reads चुटिका (2) B reads सहस्रकम् (3) This hemistich is not found in D and K (4) मुखैक धारिते वक्त्र an incorrect variant in B This hemistich is not found in K (5) रोगाणि is grammatically incorrect [रोगान् is the correct term] (6) वज्र वज्ररसायन a variant in B वज्रं तु सत्त्वं रसायने a variant in D. (7) D reads erroneously वज्रवज्रम्वा.

तेन यदास्तु ये देहास्ते देहा वज्ररूपिणः ॥ ८७ ॥
तिलमात्रं रसं[1] देवि ब्रह्मायुर्दश[2] जीवति ।
यवमात्रं रसं देवि विष्णुकोटिं स जीवति[3] ॥ ८८ ॥
गुञ्जामात्रं तु[4] देवेशि महाकल्पायुषो भवेत् ।
माषमात्रं वरारोहे मम तुल्यगुणो भवेत् ॥ ८९ ॥
मन्त्रहीनेन[5] सुभगे न स गम्यो[6] भविष्यति ।
न सिद्धिसाधनं[7] तस्य जन्मकोटिशतैरपि ॥ १०० ॥
मूढचित्तो भ्रमत्येव कुलशासनवर्जितः[8] ॥ १०१ ॥
तस्य विघ्न[9]सहस्राणि कुर्वते[10] देवदानवाः ।
देव्यदाकायशालिन्यो भूचर्यश्च[11] सुरेश्वरि ॥ १०२ ॥
स्वप्ने तं भजयित्वा तु[12] रेतोरक्तं हरन्ति ताः[13] ।

---

(1) B and D read तिलमात्ररसो. [Here भक्षयित्वा is to be understood] (2) D reads दैश, which is incorrect (3) This hemistich is not found in B and D (4) B reads गुञ्जामात्रेण (5) B reads मन्त्रहीने (6) B reads मभिशाम्रा, which is unintelligible K reads गामगाय. (7) D reads न सिद्धि साधन (8) मूढचित्ता भ्रमन्त्येषा, a partly incorrect variant in D. मूढचिंता भ्रमन्त्येषु an incorrect variant in K (9) D and K read विद्या, which is incorrect (10) D and K read कुर्वते, which is inc. (11) D reads भूतजंश्च, which is not correct (12) स्वप्नं ते य भक्षयित्वा, a variant in B स्व भक्षयित्वा तु, an incomplete variant in D. स्वप्ने तोरु भक्षयित्वा तु, a variant in K. (13) B has रक्तोरक्तं हरति ये, an incorrect variant D has रेतारक्तहरि प्रिये, K has रक्तोरक्तहर प्रिये. Both are incorrect.

तेनैव रेतोमार्गेण[1] हरन्ते भक्षितं[2] रसम् ॥ १०३ ॥
भास्कराद्या ग्रहा देवि गर्जन्ति निजरूपत:[3] ।
क्षत्रियस्य तु रूपेण देवा वै गर्जयन्ति च[4] ॥ १०४ ॥
पिशाचा वैश्यरूपेण[5] शूद्ररूपेण[6] राक्षसा: ।
अन्ये मानुषरूपेण भजन्ते स्वपनान्तरे[7] ॥ १०५ ॥
अस्थिमांसानि खादन्ति स्वप्नेषु[8] सुरसुन्दरि ।
स्वप्नान्ते प्राप्यते भ्रांति:[9] प्राय: पश्यति मानव:[10] ।
वज्रभस्म हरन्त्येव[11] स्वप्नान्ते चोभयन्ति च ॥ १०६ ॥
भक्षिते हेमविमले पलायन्ते दिशो दश ।
भूतप्रेतपिशाचाश्च शाकिन्यो गुह्यकादय:[12] ॥ १०७ ।
वज्राणां मारणे ये तु[13] लोहानां वा रसस्य तु[14] ।

---

(1) D reads हेमार्केन, which is absurd (2) B reads रक्षि which is incorrect D and K read रंजित भक्षितो, which is also inco rect (3) गर्जन्तीतीश्चरूपत:, an incorrect variant in K (4) क्ष वैशेन भजन्ति, an absurd reading in D देवि वैश्यंयन्ति च, an incorrect a incomplete charana in K (5) D and K read विद्यरूपेण, which incorrect (6) D reads शुद्ररूपेण K reads शुद्रारूपेण Both are incorre (7) भुज्यन्त स्वप्नान्तरे, an incomplete variant in B D reads भजन्ती, whi is incorrect, K reads भुजन्ते, which is also incorrect. (8) B rea स्वप्ने हि (9) D reads प्राप्यतेन K reads प्राप्य यतेन (10) पश्य मानवै, a variant in D (11, वज्रभक्षोदर तेन, a variant in D and K (12) B reads काकिन्यो K reads किन्नरो (13) B reads मारण ये D reads वज्रिको मारणे तुल्य K reads मरणो तु (14) रसमारणस्य a variant in D, which seems to be incorrect.

वर्ज्जनीयाः प्रयत्नेन[1] प्रयुक्तांस्तान् शृणु[2] प्रिये ॥ १०८ ॥
तेषां युक्तिप्रकारास्तु[3] प्रयुक्ता युक्तिदायके.[4] ।
एवं वदन्ति भूताद्या भीषयन्ति स्म तं नरम्[5] ॥ १०९ ॥
रञ्जको रागकारी[6] स्यात् क्रामणः क्रामणे हितः[7] ।
बन्धका दृढकाराश्च[8] तथा पुष्टिकराः स्मृताः[9] ॥ ११० ॥
शुक्रशोणितविण्मूत्रं विविधेन तु भक्षयेत् ।
कुष्ठव्याधिकर तच्च[10] नागवङ्गकलङ्कितम्[11] ॥ १११ ॥
त्रिफलाजातिकङ्कोलं कर्पूररसमिश्रितम् ।
खदिरं समतोयेन मर्द्दितं भक्षयेद्रसम् ॥ ११२ ॥
पयसा कटुकं दृष्ट्वा[12] पथ्यं[13] क्रामणमुत्तमम् ।

---

(1) वै वर्जनीया यत्नेन, a variant in B. (2) B has प्रयुक्ता श्रवण. D has प्रयुक्तायवणा K has प्रयुक्ता श्रवण (3) तेषां युक्तिकरा ये तु, a variant in B and K (4) प्रयुक्ता युक्तिकादय, a variant in B प्रयुक्त युक्तिकादय, a variant in D (5) This hemistich is not found in D and K (6) B reads रञ्जिको D reads रणकारी Both are incorrect. (7) क्रामणोत्क्रामणोदितम्, a variant in D K reads erroneously क्रामणी क्रामणे (8) वद्धका दृढकायाश्च, a variant in B D reads बन्धको वद्धा दृढकारायैव a variant in K (9) B reads मता. (10) कुष्ठव्याधिकर चैव a variant in D. कुष्ठव्याधिकरी ताश्च, a variant in K. (11) नागवङ्गकलङ्कितौ, a variant in D आगवङ्गकलङ्कितौ, a variant in K. (12) D reads दत्त्वा, which is incorrect (13) D and K read पश्य

स्तम्भेन हेमघृष्टेन न स्थाप्योऽयं[1] सुरेश्वरि ॥ ११३ ॥
अलम्बुषायस्कान्तस्य[2] तालकस्य[3] च भक्षणात् ।
देहे[4] क्रामति सूतेन्द्रो नात्र कार्या विचारणा ॥ ११४ ॥
अवश्यं क्रमते सूतः स्त्रीयोगे क्रामणं परम् ।
ब्रह्मचर्य्येण वा योगी[5] सदा सेवेत[6] सूतकम् ॥ ११५ ॥
समाधि कारणं तस्य[7] क्रामणं परमं मतम् ॥ ११६ ॥
प्रभाते भक्षयेत् सूतं[8] पथ्यं[9] यामद्वयाधिके ।
नो लङ्घयेत् त्रियामं तु मध्याह्ने न तु[10] भोजयेत् ॥ ११७ ॥
अतिपानं चात्यशन[11]-मतिनिद्रातिजागरम् ।
स्त्रीणामतिप्रसङ्गं चात्यध्वानं च विवर्ज्जयेत्[12] ॥ ११८ ॥
अतिकोपं चातिदर्पं मतिलौल्य मतिस्पृहाम्[13] ।
शुष्कवादं जलक्रीडामतिचिन्तां च वर्ज्जयेत्[14] ॥ ११९ ॥
कुष्माण्डं कर्कटीं चैव कालिङ्गं[15] कारवेल्लकम्[16] ।

---

(1) B has न स्थाप्योऽयं, D has स्थाप्योऽयं K has न स्थाप्योऽयं. (2) D reads अलम्बुषायस्कान्त, which is incorrect. (3) D reads तालकस्य, which seems to be incorrect (4) B reads देह (5) D and K read ब्रह्मचर्यं न वा कुर्यात् (6) D and K read पादांशेन (7) D and K read तस्य (8) D and K read सूते which is incorrect (9) D reads पथ, which is incorrect (10) B reads मध्ये न तु, which is incomplete. (11) D reads चात्यशन (12) स्वर्णं चापि वर्जयेत् a variant in D and K (13) B reads मतीर्ष्य D reads मतस्पृह. Both are incorrect. (14) अतिशोषं विवर्जयेत्, a variant in D (15) D reads कलिङ्ग (16) K reads कारवल्लिकां

कुसुम्भकञ्च कर्कोटं[1] कदलीं काकमाचिकाम्[2] ।
ककाराष्टकमेतद्धि वर्ज्जयेद्रसमन्त्रक:[3] ॥ १२० ॥
पातकं च न कर्त्तव्यं पशुसङ्गं विवर्ज्जयेत्[4] ।
लिङ्गच्छाया[5] न लङ्घेत नारीच्छायां तथैव च[6] ॥ १२१ ॥
चतु:पथे न गन्तव्यं[7] विण्मूत्रं न च लङ्घयेत् ।
सुराणां निन्दनं देवि[8] स्त्रीणां निन्दां च वर्ज्जयेत्[9] ॥१२२॥
सत्यं च वचनं ब्रूयादप्रियं न वदेद्वच:[10] ॥ १२३ ॥
कुलत्थमतसीतैल तिलान् माषान् मसूरकान्[11] ।
कापोतकं काञ्जिकाद्यं तक्रभक्तं च वर्ज्जयेत् ॥ १२४ ॥
कङ्कतीदल[12]लवणं पिच्छिलं[13] पित्तलं च यत् ।
तिलतैलं दधि घोरं[14] द्राक्षाकोलपरूषकम्[15] ॥ १२५ ॥
बदरं करविल्वञ्च[16] सहकारं सुवर्चलम् ।

---

(1) कुसुभ काचकर्कोटं, a variant in D K reads कुभीककर्कोटी, which is incomplete (2) B reads काचमारीका, which seems to be incorrect. (3) B reads मधमचक (4) पशुसंग च वर्जयेत्, a variant in K. (5) K reads लिङ्गच्छायां (6) B reads न लङ्घयेत् (7) B reads न कर्त्तव्यं (8) देवतानां न निन्देत्, a variant in D चौराश्च निन्देद्देवि, a variant in K. (9) D reads स्त्रीनिन्दां, which is incorrect K reads स्त्रीनिन्दां चैव वर्जयेत् (10) दुर्वियो न वदेद्बुध, a variant in B, which is partly incorrect. (11) B reads मसूरिका D reads मसूरिका. Both seem to be incorrect (12) B reads निम्ब (13) D and K read पिच्छलं. (14) तिल्लतैले दधिघारे, a variant in B. (15) द्राक्षाक्षो पनस तल, a variant in D and K (16) B reads नारिकेलच

नारङ्गं काञ्चनारञ्च[1] शोभाञ्जनमपि त्यजेत् ॥ १२६ ॥
क्षुधार्त्तो नैव तिष्ठेत चाजीर्णं नैव[2] कारयेत् ।
न वादजल्पनं[3] कुर्य्यात् दिवास्वापं न कारयेत्[4] ॥ १२७ ॥
नैवेद्यं नैव भुञ्जीत कर्पूरं वर्ज्जयेत् सदा ।
कुङ्कुमालेपनं वर्ज्ज्यं वर्ज्जयेदटनं चितौ ॥ १२८ ॥
नाग्निं स्पृशेत्तु[5] पादेन न गा वा[6] ब्राह्मणांश्च च ।
न हन्यात्तु कुमारीं च वातुलानपि[7] वर्ज्जयेत्[8] ॥ १२९ ॥
दिवारात्रं जपेन्मन्त्रं स्नातव्यं च दिने दिने ॥ १३० ॥
स्निग्धञ्च मुद्गा[9] दुग्धान्नं शाल्यन्नं च समाहितम्[10] ।
शाकं पौनर्नवं[11] देवि मेघनादं च वास्तुकम् ।
सैन्धवं नागरं मुस्तां पद्ममूलानि भक्षयेत् ॥ १३१ ॥
उन्नितचूचुका[12] श्यामा सुरूपा सुभगा शुभा ।

---

(1) B reads विनारंश (2) K reads न च (3) B reads वादजल्प, which renders the charaṇa incomplete (4) दिवाचारी न पर्यटेत्, a variant in B (5) D reads स्पृशेत, which is grammatically incorrect (6) B, D and K read न गावो, which is grammatically incorrect (7) B reads वातुलानां D reads वातुलानां, which is incorrect (8) After this śloka we find in B the following hemistich कुर्य्यात्तिष्ठेत चाजीर्णं न च कारयेत्, which we have rejected, the first charaṇa being absurd, and the second being a repitition (9) K wants मुद्गा (10) B, D and K read समाहित, which is not *accurate*, समाहित *here means* विशोधित and qualifies शाल्यन्न (11) D reads पुनर्नवं K reads शाक च पुन, an incomplete charaṇa (12) D reads erroneously उद्गत चूचुका

दिव्यतेज समायुक्ता कामशक्तिविवर्द्धिता[1] ।
सन्निधाने च कर्त्तव्या हृद्देश[2] परिरचिता ॥ १३२ ॥
कृष्णागौरातिहृद्वाङ्गी[3] कुशीला न भजेत् क्वचित् ॥ १३३ ॥
तिलक कुङ्कुम गन्ध[4] कस्तूर्य्या च मनोहरम् ।
सुरभीणि च पुष्पाणि सुखशय्यष्टभोजनम् ॥ १३४ ॥
सुखवासित्वमेवोक्त[5] क्रामण सूतकस्य तु ।
ग्रात्मध्यानकथा पूजा[6] शिवस्य तु विशेषत ॥ १३५ ॥
एतास्तु[7] समयान् भद्रे न लङ्घेद्रसभक्षणे ।
लङ्घनादिविध लक्ष्य लक्षण तस्य[8] कथ्यते ॥ १३६ ॥
रसराजे त्वजीर्णे तु[9] प्रत्ययोऽय भवेत् प्रिये ।
मूर्च्छा शोको भ्रम कम्प. छर्द्दिर्मोहो ज्वरस्तथा[10]॥१३७॥
हिक्काविषयशूलार्त्ति[11] निद्रालस्यमरोचकम्[12] ।
लिङ्गस्तम्भो ह्यतीसार [13] कासश्वासविजृम्भिका [14] ॥१३८॥
कर्णास्यचक्षु कुक्षौ च हृपर्णोदर[15]मूर्द्धनि ।

(1) B reads विवर्जिता (2) भ्रदेश परिरजिता a variant in D K reads हृदय (3) D reads सर्वाङ्गी K reads सर्वाणि, which is incorrect (4) तिलककुङ्कुमगन्ध च a variant in D तिलककुङ्कुमक गन्ध, a variant in K (5) D read मनोज्ञ (6) B D and K read माया (7) D reads एकसन्तु which is incorrect (8) D reads मत्र K reads चाव (9) रसराजे तु जीर्णे तु an incorrect variant in D (10) छर्दिर्मूर्च्छादिहा ज्वर, a variant in B (11) D reads व्याकुल (12) B D and K read मरोचक (13) B reads ह्यतीसार. K reads ग्रतिसार (14) B reads विजृम्भका (15) B reads जठरोदर

मेढ्रे दाहोऽग्निमान्द्यश्च[1] जातः सर्व्वाङ्गसंशय ॥ १३९ ॥
अन्यांश्चैव महाव्याधीन् रसाजीर्णे तु[2] लक्षयेत् ॥ १४० ॥
काञ्जिक[3] सर्जिकाक्षार कारवल्ली[4]रसप्लुतम् ।
गोमूत्रसैन्धवयुतं[5] तस्य संक्रामण[6] पिबेत् ॥ १४१ ॥
मोचकस्य रस देवि राजकोषातकीरसम् ।
सिन्धुक क्षारगोमूत्रं कारवल्लीरसप्लुतम् ।
सौवर्च्चलसमोपेत रसाजीर्णे पिबेन्नर.[7] ॥ १४२ ॥
रसाजीर्णे न जीवेत्तु म्रियते नात्र संशयः ।
रसायने सुजीर्णे तु तेन सर्व्वं विधीयते[8] ॥ १४३ ॥
यदा सुमसदङ्ग च[9] स्त्री स्तनेनैव घर्षयेत् ।
वामेन मर्द्दयेदेवं सूत' क्रामति निर्व्यथः[10] ॥ १४४ ॥
निवाते निर्जने स्थाने भूगृहे निरुपद्रवे ।
शीतातपविनिर्मुक्त[11] पथ्याशी लघुभोजक.[12] ।

(1) मेढ्रदाहोऽग्निवंशच, a variant in B. मेढ्र दाहाग्निमदाश a variant in D मेढदाहोग्निमदश्च a variant in K (2) B reads रसाजीर्णे K reads रसेजीर्णे (3) B reads काञ्जीक (4) B reads कारवेल्लि D reads कारवल्ली (5) This hemistich and the next two are *not found in* D K *has* गोमूत्र सैन्धव युत (6) K reads तस्य स क्रामय (7) B reads पिबेन्नृम which is incorrect (8) B has स भवेत् सर्व बध्यते which has no sense (9) स सुमेमर्दनच, a variant in B. तेऽपि सुमसदङ्गे, a variant in D K has an incomplete hemistich तेऽपि सुमन तेनैव येन् (10) K wants this term (11) D and K read विनिर्मुक्तो, which *is grammatically incorrect* (12) *B reads* लघुभुजन D reads भौमभुक्तर K reads लघुभक्षक All a e incorrect.

यथोक्तदिवसे.[1] सिद्धिं प्राप्नुयान्नात्र संशयः ॥ १४५ ॥
सर्व्वाहारेण[2] दिवसैर्द्विगुणैः सिद्धिमाप्नुयात् ।
सेवनाच्छीतवाताभ्यां[3] त्रिगुणैर्दिवसै. क्रमात् ।
अतिमार्गस्य धर्म्मेण[4] दिवसैस्तु चतुर्गुणैः ॥ १४६ ॥
तत्र वेधं प्रवक्ष्यामि देहसिद्धिकपूर्व्वकम्[5] ।
तव स्नेहेन देवेशि प्रोक्तमेव रसायनम्[6] ॥ १४७ ॥
त्वग्वेधः प्रथमं देवि[7] मांसवेधो[8] द्वितीयक· ।
तृतीयो रक्तवेधस्तु[9] चतुर्थ्यास्थिवेधकः[10] ॥ १४८ ॥
पञ्चमो मज्जवेधः स्मृतस्[11] नाड़ीवेधस्तु षष्ठकः[12] ।
सप्तमो धातुवेधश्च[13] अष्टमः कवचस्य तु ॥ १४९ ॥
त्वचावेधेन देवेशि पवगः कुटिलो भवेत् ।
मांसवेधेन सुभगे कुटिल. काञ्चनं भवेत्[14] ॥ १५० ॥

(1) D reads यथोक्ता दर्शने, which is incorrect (2) D has सिद्धावहारेण. K has सर्व्वहारेण Both are incorrect. (3) B reads सेवनाच्छीतवाताभ्यां D reads से नना चिनि वा विनि K reads सेवनाच्छिती वाताभ्यां. All are incorrect (4) D reads अश्वनि मार्गस्य धर्मे च, which is incorrect K reads अधाम, which is also incorrect (5) This hemistich and the next one are not found in D. (6) K reads मपूर्वत (7) D reads देव, which is incorrect (8) B reads मांसवेधो, which is not correct D reads खवेधो, which is also incorrect. (9) D and K read चौरवेधस्तु (10) चतुर्थथाथिवेधक', an incorrect variant in D (11) D has मज्जवेध K has मज्जवेध Both seem to be incorrect. (12) D has षडम, which is incorrect. (13) B and D read धातुवेध (14) This sloka is not found in D

अस्थिवेधेन देवेशि तीक्ष्णं कनकतां व्रजेत् ।
मज्जवेधो[1] वरारोहे लोहान्यष्टौ च वेधयेत् ॥ १५१ ॥
कवचस्य तु वेधेन मृन्मयं काञ्चनं भवेत् ।
वेधे तु[2] हेमविमले मज्जघ्नो[3] हेम प्रजायते ॥ १५२ ॥
तारे[4] मासं सुरेशानि जीर्णसूतश्च वेधयेत् ।
अलके[5] विमले ताम्रे तीक्ष्णे तारे च[6] भास्करे ॥ १५३ ॥
क्रामणं तु भवेत्तत्र शर्करा माक्षिकं तथा ।
कपिलाक्षणगोतक्रं तत्तु[7] देवि रसायने[8] ॥ १५४ ॥
सात्त्विकं गव्यतक्रं तु राजसं सारसोद्भवम्[9] ।
तामसं माहिष[10] तक्रं हेयं नैव[11] रसायने ॥ १५५ ॥
आर्द्रकस्य रसो देवि तथा पूग[12]फलानि च ।
मर्दनं नवनीतेन रसस्य क्रामणं परम् ॥ १५६ ॥
अधमं शाकमूलोत्थं मध्यमं फलमूलजम् ।
उत्तमं देवदेवेशि रसकं तु रसायने ॥ १५७ ॥

---

(1) B and K read मज्जाविधे (2) B reads वेध तु (3) B reads मज्जनात् D and K read मज्जानो (4) B reads तार (5) D reads अलके K reads अलका. *Both seem to be incorrect* (6) K reads तीक्ष्णतारे च (7) K reads तत्र (8) B reads रसायनं (9) छाग मद्या रसोद्भवम् a variant in B (10) D reads पवित K reads महिषं (11) B has रसो नैव But D and K have हेयं नैव We *have adopted the latter opinion since तक्र is the worst of the kind.*
(12) D reads तथा पूरी

सौवर्णवेधेन नीलाभ [1] ताम्रेणारुणसंप्रभ ।
रजतेनेन्दुसंकाशो[2] हेम्ना काञ्चनसन्निभ.[3] ॥ १५८ ॥
धूमावलोकी वक्त्रस्थो[4] मासात् खेचरतां नयेत्[5] ।
स्पर्शवेधी तु वक्त्रस्थो[6] द्विमासात् सिद्धिदायकः ॥ १५९ ॥
शतकोटिस्त्रिभिर्मासै. चतुर्भिर्दशकोटिक [7] ।
पञ्चभि पञ्चकोटिश्च[8] षड्भि स्यात् कोटिवेधक.[9] ॥१६०॥
एवं क्रमेण कुरुते शरीरमजरामरम् ।
अणिमादिगुणैश्वर्यमाशासिद्धिः प्रजायते[10] ॥ १६१ ॥
सप्तभिर्लक्षवेधी स्यादष्टाभिश्चायुतं पुन.[11] ।
सहस्र नवभिर्मासैर्दशमासै शतं पुन ॥ १६२ ॥
तस्य मूत्रपुरीषैस्तु श्लेष्मणाङ्गमलैस्तथा ।
लेपाद्धेमत्वमायान्ति[12] पाषाणादीनि[13] भूतले ॥ १६३ ॥
चतुःपञ्चशतो वेधो मासैकाद्दशवेधक ।

---

(1) सौवर्णवेधेन नीलाभ, a variant in B, which seems to be incorrect D and K read नीलाभ (2) This charana is not found in D (3) B reads हेम D wants this hemistich (4) धामावलोकी चक्रस्थो, an incorrect variant in D (5) मासं खेचरतां व्रजेत् a variant in D (6) D reads वक्त्रस्थो which is incorrect (7) D reads दशकोटिभि K reads दशकोटय (8) कोटिवेधी पञ्चभिर्मासै, a variant in D (9) B reads दशकोटिकृत् D reads षण्मासे instead of षड्भि स्यात् K reads दशकोटय (10) D and K read मतर्त्यते. (11) D has दृष्टभिश्च पुन् ,पुन (12) लेपयन्धेमत्व, an incorrect variant in D (13) B reads यानि लौहानि

द्वात्रिंशांशकवेधी तु[1] यथोद्दिष्टं तु वेधयेत्[2] ॥ १६४ ॥
कुञ्चिताग्रास्तु यत्केशा या श्यामा[3] पद्मलोचना ।
विस्तीर्णं जघनं यस्याः[4] सङ्कीर्णं हृदयं भवेत् ॥ १६५ ॥
कृष्णपक्षे भवेद्यस्या युवत्याः पुष्पदर्शनम्[5] ।
कामिनी सा समाख्याता उत्तमा च रसायने ॥ १६६ ॥
आलिङ्गने स्पर्शने च[6] मैथुनालापयोरपि[7] ।
सर्व्वरोगविनिर्मुक्तो वलीपलितवर्ज्जितः ॥ १६७ ॥
नासौ छिद्येत शस्त्रेण पावकेन न दह्यते[8] ।
वायुवेगो महातेजा. कामदेव इवापरः ॥ १६८ ॥
इच्छया जायते दृश्यो ह्यदृश्यश्चैव[9] जायते ।
तस्य[10] सस्पर्शमात्रेण सर्व्वलोहानि काञ्चनम् ॥ १६९ ॥
तस्मिन्नेकार्णवे घोरे नष्टस्थावरजङ्गमे[11] ।
देवा यत्र विलीयन्ते[12] सिद्धस्तत्रैव लीयते[13] ॥ १७० ॥

---

(1) द्वात्रिंशत् कोटिवेधी च, a variant in D (2) यथेष्टं हेम वेधयेत्, a variant in D. (3) D reads श्यामा या K wants this hemistich and the next one (4) B reads विस्तीर्णजघनं यस्याः, which is not accurate (5) D reads पुष्पकर्षणि, which is incorrect. (6) आलिङ्गने स्पर्शने, a variant in B आलिङ्गन स्पर्शने च, a variant in K. (7) D reads erroneously मैथुनाद्दे ब्रयोरपि (8) पावकेन च विद्यते, an incorrect variant in D (9) सैद्दश्यश्चैव, a reading in D and K, which is incorrect. (10) D reads erroneously तस्म (11) नष्टे स्थावरजङ्गमे, a variant in D (12) K reads विलियते (13) सिद्धश्चैव जायते, a variant in D

इदं रहस्यं परमं मया प्रोक्तं[1] सुरेश्वरि ॥ १७१ ॥
साधुसज्जनसारघ्ना रसजीर्णक्रियापराः ।
रसवादीति संप्रोक्ता[2] इतरे द्वेषवादिनः[3] ॥ १७२ ॥
पुनरन्यां[4] प्रवक्ष्यामि गुटिकां रसदुर्लभाम् ॥ १७३ ॥
वङ्गसीसकशुल्वाभ्र-हेमतारसमन्वितः[5] ।
वज्रायसादिभिर्युक्तं क्रियते वादिकैः[6] रसः ॥ १७४ ॥
सर्व्वांस्तानेकतः कृत्वा[7] मूषामध्ये स्थितान्[8] धमेत् ।
गुटिका जायते दिव्या नाम्ना वज्राङ्गसुन्दरी ॥ १७५ ॥
मुखस्था सिद्धिदा प्रोक्ता जरामृत्युविनाशिनी ॥ १७६ ॥
संग्रामे विजयी वीरो वज्रदेहो महाबलः ।
सर्व्वलोकप्रियो नित्यं नारीणां सुभगस्तथा ॥ १७७ ॥
वज्रव्योमजसत्त्वकं सकनकं[9] चन्द्रं रविं कान्तकं[10]
नागं वङ्गमयायसं[11] दृढतरं सूतं हतं तत्समम्[12] ।

---

(1) B reads प्रोक्त. This bemistich and the next three are not found in D (2) B reads रसवादी इति प्रोक्त K reads रसवादि इति प्रोक्त (3) B has दूषणवादिन, which is incorrect (4) K reads पुनरन्य, which is not correct (5) D reads समन्विते (6) B reads वादको (7) B reads सर्वांस्तामेकीकृत which is incorrect (8) D reads मूखामध्ये स्थितौ K reads मूखामध्ये स्थिता Both are incorrect. (9) D has वज्राकीकमकं K has वज्रतां सकनक Both are incorrect (10) D reads चांद्र रविसम K reads चांद्र रवि कलक Both are incorrect (11) B reads नाग वगतीक्ष्णायस D reads तीक्ष्ण कान्त तदायस K reads तीक्ष्ण कान्त तदायस (12) मूतक कृत्य तत्सम, an incorrect variant in D

वज्रास्थं रसगोलकं रतिकरं सर्व्वार्थदं तापहं[1]
वर्षैकेन निहन्ति दोषनिचयं कल्पायुषो जायते ॥१७८॥
पूर्व्वसिद्धरसे[2] देवि पादांशं[3] हेम योजयेत् ।
मृतवज्रपलांशेन[4] व्योमसत्त्वं प्रयोजयेत् ॥ १७९ ॥
चीरकञ्चुकितोयेन सुरदालीरसेन च ।
विधिना मर्दयित्वा तु नष्टपिष्टं तु कारयेत्[5] ॥ १८० ॥
कान्तचूर्णत्रुटिं[6] दत्त्वा मूकमूषागतं धमेत् ।
गुटिका[7] जायते दिव्या वज्रस्था सर्व्वसिद्धिदा ॥ १८१ ॥
सुभग माक्षिकं[8] चैव वज्रमभ्रकमेव च ।
हेम शुल्वं तथा तारं[9] समभागानि कारयेत् ।
वज्रबद्धा तु गुटिका वज्रस्था सर्व्वसिद्धिदा[10] ॥ १८२ ॥
भ्रामकं माक्षिकं चैव लोहत्रयसमन्वितम् ।
शक्तिबीजसमायुक्तं बीजत्रयसमन्वितम्[11] ॥ १८३ ॥
विदच्छौसहितं सूतमेकीकृत्य[12] च गोलकम् ।
अन्धमूषागतं ध्मातं समावर्त्तं तु[13] कारयेत् ॥ १८४ ॥

---

(1) B reads सर्वार्थसंतापदं. D reads सर्वार्थसतापद K reads सर्वार्थि संतापदं (2) D and K read पूर्वासिद्धरसो, which is incorrect (3) B reads पादांश (4) B reads कलांशेन (5) D wants this charana and the next one (6) B reads त्रटि which seems to be incorrect (7) B reads घुटिका (8) D has सुवह सुभगां, which is not correct (9) D reads ताप (10) This hemistich and the next one are not found in K (11) D wants this hemistich (12) D and K read समेकीकृत्वा which is *grammatically incorrect*. (13) B reads समावर्त्तन्तु which is not correct

पूजां कृत्वा चिपेद्वह्नौ पक्षमासात् स भवेत् प्रिये ।
अभयः सर्व्वशत्रूणां[1] वज्रकायो महाबलः ॥ १८५ ॥
नन्दिकेश[2]कुमाराद्या भक्ष्यमाणं हरन्ति ये ।
नष्टच्छाया न दृश्यन्ते हस्ते ददति[3] भस्म च ॥ १८६ ॥
क्रियमाणं रसं तेषु[4] मूढबुद्धिर्न पश्यति[5] ।
कथयेत् सर्व्वजन्तूनां न मे सिद्धो[6] रसायने ॥ १८७ ॥
मनसा रससिद्धिस्तु[7] तथा क्लेशो मया कृत.[8] ।
मया कृता द्रव्यहानिर्दुर्धिया[9] मूढचेतसा ॥ १८८ ॥
ईदृशं नैव जानाति[10] विधिहीनं मया कृतम् ।
पापिष्ठो दूषयेच्छास्त्रमात्मकर्म्म न विन्दति ॥ १८९ ॥
विधिहीनो रसो देवि[11] नैव सिध्येत्[12] कदाचन ॥
शास्त्रहीनस्य देवेशि नैव सिद्धिर्वरानने[13] ॥ १९० ॥
अशुभैः कर्म्मभिः सर्व्वैः[14] सम्प्रदायो न सिध्यति[15] ।

---

(1) B reads सर्व्वशस्त्राणां. (2) B and D read नन्दिस्कन्द, which is a repitition. (3) D reads ददाति, which is grammatically incorrect (4) क्रियमाण रसैसेषु, a variant in K, which is incorrect (5) D reads नियच्छति K reads न पश्यति (6) B, D and K read सिद्धि, which is grammatically incorrect. (7) K reads रससिद्धि (8) D and K read मम. D reads कृति instead of कृत (9) D and K read दु धिया, which is incorrect. (10) ईदृश नैव जानामि, an incorrect variant in D (11) D and K read erroneously देवी (12) D reads सिद्धि (13) नैव सिद्धि रसायने, a variant in K, which is partly incorrect (14) D reads पूर्वै K reads सर्व. (15) सम्प्रदायो न सिध्यते, a variant in B सम्प्रदानेन सिध्यति a variant in D

न सिध्येद्रसशास्त्रे तु[1] न सिध्येत्तादृशी गुरु[2] ॥ १८१ ॥
न प्राप्येत्तादृशीमात्रा[3] नैव स्थानं च तादृशम्[4] ।
न प्राप्येत्तादृशीं नारीमेकचित्तां वरानने ॥ १८२ ॥
न प्राप्येद्रसवन्तं च तां च देवीं रसाङ्कुशीम्[5] ।
यस्य तुष्टः शिवः साक्षात्तस्य सिद्धी[6] रसायने ॥ १८३ ॥
पुनरन्यत्[7] प्रवक्ष्यामि गोलबन्धनमुत्तमम् ।
येन भक्षितमात्रेण[8] जायते ह्यजरामरः ॥ १८४ ॥
गन्धाभ्रकान्तसहितं भानुखर्परकाञ्चनम् ।
समं तोल्यं[9] रसेन्द्रस्य बद्धं कृत्वा तु गोलकम् ॥ १८५ ॥
रसेन्द्रं पञ्चपलिकं[10] समभागेन मेलयेत् ।
सप्तजम्बीरतोयेन[11] मर्दयेद्गोलकस्य च[12] ॥ १८६ ॥
छायाविशुष्कं गोलं तु शशिभावं करोति तत् ।

---

(1) न सिध्येत्तादृशी शास्त्रे, a variant in D (2) न सिध्येत्तादृशैर्गुणैः, a variant in D न सिध्येत् वरानने, an incorrect variant in K (3) D reads तादृशीं स्त्रियं (4) स्नानं ध्यानं ह्यस्थानं तादृशं, an incorrect variant in D This hemistich and the next one are not found in K (5) B reads रसाङ्कुशी (6) K reads erroneously सिद्धि (7) B, D and K read पुनरन्य, which is grammatically incorrect (8) येन च स्पर्शमात्रेण, a variant in D येन भक्षणमात्रेण a variant in K (9) D reads सम तोल्ये K reads समौ तोल्ये Both are partly incorrect (10) रसेन्द्र पञ्चपिलक, an incorrect variant in D (11) B reads सप्त जम्बीर K reads सप्तवीज रसो येन (12) यथा तद्गोलकस्य वा, a variant in B गोलकस्य यथाद्यथा an incorrect variant in K.

एतत् सर्व्वं विमर्द्दं तु सूतकं गोलकस्य च[1] ॥ १८७ ॥
तत् करीषाग्निना भूमौ मृदुस्वेदं तु कारयेत् ।
वक्त्रे स्थितमिदं गोलं चामरतामदायकम् ॥ १८८ ॥
सूतगोलकजातस्य फलं वक्तुं न शक्यते[2] ।
रसायने वर्णकरो[3] रससिद्धिप्रदायकः[4] ॥ १८९ ॥
सुगन्धलेपताम्बूल-कस्तूरीकुङ्कुमागुरु ।
श्रीखण्ड मृगनाभिश्च कङ्कोलं जातिकाफलम्[5] ।
अन्यानि च सुगन्धीनि[6] स्नाने याने प्रदापयेत्[7] ॥ २०० ॥
[कुञ्चिताग्रास्तु यत्केशा[8] या श्यामा[9] पद्मलोचना ।
विस्तीर्णं जघनं यस्या, सङ्कीर्णं हृदयं भवेत् ॥ २०१ ॥
कृष्णपक्षे भवेद्यस्या युवत्या, पुष्पदर्शनम्[10] ।
कामिनी सा समाख्याता[11] उत्तमा च रसायने ॥ २०२ ॥
आलिङ्गने स्पर्शने च मैथुनालापयोरपि ।
सर्व्वरोगविनिर्मुक्तो वलीपलितवर्ज्जितः ॥ २०३ ॥][12]

(1) This hemistich and the next two are not found in D (2) This hemistich is not found in B and K (3) D reads वर्त्तकरो K reads वालकरो (4) This hemistich is not found in B (5) D reads जायकाफलम् (6) B and D read सुगन्धानि. (7) स्नाने पानानि यानि तु, a variant in B. (8) आकुञ्चिताग्रा यत्केशा, a variant in D and K (9) D reads श्यामाश्यामा, which is incorrect K reads श्यामा या (10) D reads erroneously पुष्पदर्शने (11) K reads सख्याता (12) The above three slokas within brackets and the following two slokas within brackets seem to be a repetition of the previous slokas—165, 166, 167, 168 and 169 As these were found in all the texts, we have kept them within brackets

शतरोगं विनश्येत्[1] सुखमध्ये घृतेषु च[2] ।
यवतुल्यप्रमाणेषु जीवेद्वर्षशतत्रयम् ॥ २०४ ॥
अथ षोडशवर्षाणि[3] षोडशानि सुरेश्वरि[4] ।
घृतानि सुखमध्ये तु तेषु वक्ष्यामि ये गुणाः ॥ २०५ ॥
[नाशो क्रियेत शस्त्रैश्च पावकेन न[5] दह्यते ।
वायुवेगो महातेजाः कामदेव इवापरः ॥ २०६ ॥
इच्छया जायते ह्रस्वो बृहत्त्वश्चैव जायते ।
तस्य संस्पर्शमात्रेण सर्व्वलोहानि काञ्चनम्[6] ॥ २०७ ॥]
पुनरन्यं प्रवक्ष्यामि वज्रबन्धं सुरार्चिते[7] ॥ २०८ ॥
हीनाङ्गोऽप्यधिकाङ्गश्च[8] सव्याधिः कुब्ज वामनः[9] ।
नताङ्घ्रिः[10] पाणिनि स्तो[11] जरया क्षोभितेन्द्रियः[12] ।
जडगद्गदमूकोऽपि[13] गतिहीनस्तथैव च[14] ।

(1) B reads शतवर्षेषु पश्चात्तमु, which has no sense (2) K reads मुखाग्रमध्ये घृतेषया, wherein the first term is incorrect (3) अथवा षोडशपूर्णानि a variant in D. (4) षडाने सुरसुन्दरि, a variant in D. (5) D reads पावकै नैव (6) This hemistich is not found in D (7) B reads सुरेश्वरि (8) B has हीनाङ्गाप्यधिकाङ्गाय, D has हीनाङ्गाः विहीनाङ्गाय K has हीनाङ्गाप्यधिकाङ्गाय. (9) B reads कुब्जमानत D reads सर्वे व्याधिपराजिता K reads कुमानत which is incomplete (10) B reads नताङ्घ्रि (11) जराजर्जरिताङ्गाय a variant in D. (12) जरयस्तो जितेन्द्रिय, a variant in B कामयन्तो जितेन्द्रिया, a variant in D जरापन्न जितेन्द्रिय a variant in K. (13) जन्दमूकाऽपि an incorrect variant in B जडान्धबधिरहीनोऽपि, a variant in D, which has no sense जडन्दमूकादि, an incorrect variant in K (14) D reads मूको वाक्यविहीनश्च . K reads चन्द्रहीनश्चैव च, which is a repitition

शुक्लत्वचविनिर्मुक्तो[1] जीवितैरेव तिष्ठति[2] ॥ २१० ॥
वहस्यास्य प्रभावेन समावर्त्ती यदा भवेत्[3] ।
कोटिवेधि रसं ग्राह्यं पिण्डषट्केन संयुतम्[4] ॥ २११ ॥
एकैकस्य तु मध्यस्थां गुटिकां कारयेद्बुधः ॥ २१२ ॥
गुटिकाः पञ्चसंख्याता॰ षष्ठी चैव तु पञ्चमी[5] ।
षट्संगुणितपिण्डं स्यात्[6] ताम्रपात्रं सुशोभनम् ।
ऊर्द्ध्व[7] पुरुषमात्रं तु पुरुषार्द्धं च[8] मण्डलम् ।
चतुर्मुखकृतं[9] काष्ठं तस्योपरि निवेदयेत् ॥ २१३ ॥
सघृतं च महातैलं समभागेन लेपयेत्[10] ।
पूजयित्वा कटाहं तु दिक्पालांश्चैव पूजयेत् ॥ २१४ ॥
कुमारीं पूजयेत् पश्चाद्द्याद्दिक्षु बलिं[11] तथा ।
धमनं तत्र कुर्व्वीत चतुर्द्दिक्षु शनैः शनैः ॥ २१५ ॥
सुतप्तं च विधातव्यं[12] निर्धूमं च यदा भवेत्[13] ।

---

(1) D has शुक्ल च विनिर्मुक्तो, which is senseless K has चक्षुत्व च विनिर्मुक्तो, which is also absurd (2) जीवैत्र मरदो मत, a variant in D, which is quite opposite in meaning जीवयोवैरपलिप्तते, a variant in D. (3) D reads सुखमध्ये प्रदापयेत् (4) पिण्डषट्कोपसंस्थित, a variant in D and K (5) B reads षष्ठ चैव च पञ्चमम् D reads षष्टा प्र पञ्चम K reads षष्टं चैव तु पञ्चम (6) B reads पिण्डस्या D reads पिण्डे स्यात. (7) B reads ऊर्ध्वं (8) B has पुरुषार्धेन (9) B reads चतुर्मखे कृत. (10) D reads प्रलेपयेत् (11) D reads दद्यादष्ट K reads धर्मौ (12) मल सत्य विधाम तु a variant in D मूर्त सत्य विधान तु, a variant in K. (13) रक्तवर्णे भवेत्तदा, a variant in D. K reads यथा भवेत्

तदा नत्वा गुरुं देवं[1] चन्द्राकादि[2]ग्रहानपि ।
नक्षत्राणि च संपूज्य[3] आसनं तत्र निक्षिपेत्[4] ॥ २१६ ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च[5] ।
सुदुर्लभं विजानीयात्[6] सिद्धिरूपं नियोजयेत् ॥ २१७ ॥
कललं च भवेत् सर्व्वं पुरस्तापो विनिक्षिपेत्[7] ।
रक्तवर्णं विजानीयात्तेजस्तेजसि योजयेत्[8] ॥ २१८ ॥
मांसपिण्डं भवेत्तत्र वायु[9] तत्रैव निक्षिपेत् ।
कान्तवर्णं[10] तदा कार्य्यं निक्षिपेत् ख कपालके[11] ॥२१९
धमन्त[12] हेमसकाश चारत्व तन्तु[13] पादयेत्[14] ॥ २२० ।
ज्ञात्वा तत्र महाराव[15] द्वारं सुरपूजितम्[16] ।
उत्तिष्ठति[17] न सन्देहः पुष्टाङ्गो भास्करो यथा ।

(1) D has नत्वा गुरु नवपति K has पवान् (2) K reads द्वार्य which is incomplete (3) B reads ऋषि पूज्य D reads योनिगोल K reads ऋषिपूजां (4) वर्षि तत्र विनिक्षिपेत् a variant in B. (5) D reads वायुराकाशमेव च which is incomplete (6) D reads सदुर्लि B reads सुदुर्लभ विज्ञयेत Both seem to be incorrect (7) D reads पुरस्तात्रिप which is incorrect (8) B reads तेजे तेजं नियोजयेत् which is incorrect (9) D reads यत्र (10) D reads कान्तवर्णं B reads तत्तद्वर्णं (11) B reads तत्र कपोलके D reads खकनिलके K reads खकपालिकौ (12) B reads धमत D reads धमन्त K reads धमने (13) B has प्रातत्व तत्र K reads तत्र (14) B and D read दापयेत् (15) D reads महारावं (16) B reads द्वार D reads द्वाकार सुपूजितम् (17) B reads उत्तिष्ठते which is not correct K reads उत्तिष्ठति which is also incorrect

दिव्यतेजा महाकायो दिव्यदृष्टिर्महाबलः[1] ॥ २२१ ॥
शतयोजनविस्तीर्णं घण्टाराव सुपूजितम्[2] ।
दीप्तहेममय दिव्य रत्नमाणिक्यशोभितम् ॥ २२२ ॥
पुष्पमालापताकाढ्य[3] किङ्किणीजालमण्डितम् ।
विमानोत्तममारूढं शङ्कादहलनि.स्वने. ॥ २२३ ॥
अप्सरोगीतवादित्रैर्नृत्यैरपि मनोहरे ।
दिव्याभरणसपूर्णा दिव्यमाल्योपशोभिता[4] ॥ २२४ ॥
अपाङ्ग[5]रागसम्पन्ना सुरूपा मदविह्वला[6] ।
आगच्छति न सन्देहो देवकन्योदित प्रति[7] ॥ २२५ ॥
गृहीत्वा साधकेन्द्रं च सिद्धलोके वसेत्तत.[8] ॥ २२६ ॥
दिव्यानि स्नानपानानि[9] दिव्यान्याभरणानि स ।
रमते शतसाहस्र[10] सिद्धकन्या स्मरातुरा.[11] ॥ २२७ ॥

---

(1) After this sloka we find in D a portion of a work called वीरामित्र, which being quite unconnected with the present subject, we have rejected (2) K reads अगत्य च शिवपूजित, which has no clear sense (3) K has पुष्पमालायुत काढ्य wherein the last term is incorrect (4) दिव्यमाल्यै सुशोभिता a variant in K (5) B D and K read अपांग (6) B reads दिव्यकामिनी (7) B reads आदित्य दौयतामिति D reads देवकन्योन्वित प्रति (8) B reads सिद्ध—अति ता D reads सिद्धलोका वसन्ति च These two readings are partly incorrect K reads सिद्धलोक वसतत. (9) K reads स्नानि पानानि (10) B has रमत only K has रमते (11) D and K read स्मरातुराम् which is incorrect as there is सिद्धकन्या in plural number

तस्मिन्नेकार्णवे घोरे नष्टस्थावरजङ्गमे ।
देवा यत्र[1] विलीयन्ते सिद्धस्तत्रैव लीयते ॥ २२८ ॥[2]
भूतकालान्तको नाम चण्डोऽयमुपवर्णितः[3] ॥ २२९ ॥
तत्त्वतोऽयं[4] महादेवि यदा कर्त्तुं न शक्यते ।
अनेनैव शरीरेण तदा[5] सिद्धिर्भविष्यति ॥ २३० ॥

इति श्रीपार्वतीपरमेश्वरसंवादे[6]
रसार्णवे रससंहितायां
देहवेधो नाम[7]
अष्टादशः पटलः ।

॥ समाप्तश्चायं ग्रन्थः[8] ॥

---

(1) B reads भुवनानि (2) This sloka is a repitition of the previous sloka No 170 (3) चन्द्रोऽयमुपवर्जितः, an incorrect variant in D (4) तत्त्वतोऽयं a reading in D. तत्त्वतोऽयं a reading in D तत्त्वतोऽयं a reading in K (5) D and K read यदा (6) B and D want this portion (7) D reads देहविधो नाम, which is incorrect (8) B has ॥ इति श्रीरससंहितायां रसार्णवः सम्पूर्णम् ॥

एतद्ग्रन्थसङ्कलनम् ।



काश्मीराद्दचिणावर्त्तात् बिकानीराच्च देशत. ।
मान्द्राजाच्चैव नगरात् बहुवित्तोपघातत. ॥
प्रफुल्लचन्द्ररायेण रसायनविपश्चिता ।
श्रीमता धीमताहृत्य तन्त्राणि बहुयत्नत ॥
तेषान्तु बहुदोषाणामशुद्धानाञ्च सर्वत ।
पाठापाठविवेकाय विशुद्धीकरणाय च ॥
नियुक्तः श्रीहरिश्चन्द्र कविरत्नाभिधो द्विजः ।
रसार्णवमिम ग्रन्थ कलयामास यत्नत ॥
कलिकातापुरे चन्द्रनेत्रपक्षिन्दुसम्मिते ।
शाके ग्रन्थ समाप्तोऽय तपोमासेन्दुजे दिने ॥



INDEX

WITH

GLOSSARY

N B. The reader is requested to consult the Table of Errata and variants before referring to this Index

अ

८७ (Red) ३२४, (Yellow) ३२५, ३८६, ४०६ &c

अरविन्दोत्पल (Red lotus) ७०

अर्क (Calotropis gigantea, Beng ákanda) ७४, १२१, १२२ &c

अर्कक्षार (Alkali of ákanda) ७४

अर्कक्षीर (Milky juice of ákanda) ८७, ११६, ११८ &c

अर्कदुग्ध (See अर्कक्षीर) ८७ १००, ३५७

अर्कपत्री (अर्कपत्रिका) (=ईश्वरमूल Beng isher múl) ६१

अर्कपय: (See अर्कक्षीर) ३४८

अर्जुन (Terminalia arjuna, Bedd , Beng arjun) १६८

अर्जुनक्षार (The text अर्जुन means here अर्जुनक्षार or Alkali of arjuna) ७४

अर्जुनी (=ज्वालामुखी=रक्तचित्रक —रसकामधेनु) ६२, ३८४

अलक (=देवदाली—रसकामधेनु, see देवदाली) ११८

अलक (d r आलक, हरिताल, see ताल) ४२४

अलम्बुषा (A sort of लज्जालुका, a sensitive plant) १६०, ४१८

अलर्क (Calotropis gigantea alba or procera, Beng sveta (white) ákanda) १८५

अश्मदलनी (=अश्मभेदक, Beng patharchúr) १३१

अश्वगन्धा (Withania somnifera, Dunal, Beng asvagandhá) १२२, ३८८

अश्वत्थ (Ficus religiosa, Linn , Beng asvattha) ८६

अश्वमार (=श्वेत करवीर, Beng white karabí) ३५०

अष्टमूलिका (Eight plants used for the purification of mercury) ६३

असन (Terminalia tomentosa, W and A , Beng piásál) ६६

अस्थिशृङ्खल (=अस्थिसंहार Vitis quadrangularis, Wall., Beng hádjoda) ८६

अहि (See नाग) १८८, २०७

अहिमर (See अहिमार) २६८

अहिमार (—विट्खदिर Acacia

once killed, mercury) १५०, १६३, १६५, ३५४, ३८१, ४०१&c.

आर्द्रक (Zingiber officinale Rosc Beng. ádá) ६४, १४४ &c.

आवर्त्तक (=रौप्यमाक्षिक, see माक्षिक) ६८

